M. T. B. COLLEGE, SURAT
Manuscripts Library

No Ref. / Ser. 648

Title : Antyeshti Prayoga

648

अन्त्येष्टिप्रयोग: Incomplete

	: Antyeshti Prayoga		: Title
:	:		: Author
:	:		: Editor
:	:		: Year, Vols.
:	:		: Publisher
648 :	: Begins & Ends abruptly		: Remarks

मे १

848

र्थं वा निधाय॥ अमुकस्य जन्मनि प्रभृति आद्यया वर्तमाना ज्ञानकामामका
मसकृदसकृत्कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभु
क्तपीतापीतसकलपापेनकमहापातकअतिपातकउपपातकश्च [illegible] पातकसंक
रीकरणमलिनीकरणअपात्रीकरणजातिभ्रंशाकरणप्रकीर्णपातका
नां मध्ये संभावितानां पापानां निरासार्थं मामनुग्रहं कु[illegible]याः प्रायश्चि
त्तमुपादिशंतु भवंतः॥ तथा सर्वे धर्मविविकारो [illegible]रः सकला द्विजाः॥
मम देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः॥ मया [illegible] घोरं ज्ञातमज्ञा
तकिल्बिषं [illegible]ः कृपया तामह्यं [illegible] पूज्यैः कृतप
वित्रोहं [illegible] द्विजसत्तमैः॥ एवं मा[illegible]येत्॥ पुनरादि[illegible]स्नानाय प्रायश्चित्तकर्मा

अंत्ये॰ २

नदात्मक[illegible]ख्यानेन तन्नाम्ना निर्दिशेत्॥ प्रार्थनानंतरं ममानुग्रहं कर्तुं भवं
तश्शक्तिमामे[illegible]तत्तेन समार्यनस्य शरीरः द्रव्यादिशक्तिमुत्तममध्य
मादिपक्षोऽस्य विचार्यास्मिन्पक्षेऽयं शक्त इति निश्चित्य पुस्तकवाचनपूर्व
कं कथयेयुः॥ अनुवादकस्याप्येष त्वाम्नायोऽस्य शक्तिं कल्पयेयुः॥ अ
स्मिन्काले प्रायश्चित्ती चंदनपुष्पादिभिः पुस्तकपूजां सभ्यानुवादकपू
जां विधाय निबंधपूजां विना किंचिद्यथाशक्ति द्रव्यं निधाय कृतांजलि
पुरो नम्रस्तिष्ठेत्॥ अनुवादकाय यथायथानुसारेण वस्त्रादिरूपां दक्षि
णां दद्यात्॥ ततोऽनुवादकः पूर्वोक्तविशेषणविशिष्टानां पूर्वोक्तानां म
हापातकव्यतिरिक्तानां पातकानां क्षयायेयेन पर्षदुपदिष्टेन सर्वप्राय

प्रयो॰ २

श्चित्तेन अमुकप्रत्याम्नायद्वारा प्राच्योदीच्यांगसहितेन आचीर्णेनन वशु
द्धिर्भविष्यति तेन त्वं कृतार्थोऽनुविष्यसि इत्युपदेशे त्रिं[illegible]सर्वप्रायश्चित्तं
शास्त्रानुसारेण पर्षद्दोऽनुमते प्रत्याम्नायस्य गायत्र्याः श्रुतजपतिलहोम ५२
सहस्रवेदशाखाब्राह्मणभोजने तीर्थयोजनयात्रायां एकगोदाने सुवर्णरू
प्यनिष्कतदर्धतदर्धानां गोमूल्यानां शक्त्याददानेषु एकैकस्य द्वादशा
नानेषु द्विगुणवादशानां नदानादौ चैकः प्राजापत्य इति॥ तत्र शा
कस्यामां नं द्विगुणं द्रव्यं चतुर्गुणमित्यादि योज्यं॥ निष्कस्य लोकशा
स्त्रयोः एकवाक्यतायां मापः॥४०॥ तदर्धं २० तदर्ध १० मुख्यं सुवर्णं तद
शक्तो रजतं ग्राह्यं॥ ततो निवेदितं प्रायश्चित्तं भवदनुग्रहं इत्यंगीकृत्य स

अंत्ये· स्नानपूर्वं प्रणम्य पर्षदं विसर्जयेत्॥ अस्मिन्नद्दशक्तौ नोपवासः कार्यः॥ इतरे
३ णाद्रविष्यासनं॥ ततः कस्यांचिद्दिकायां नियौक्त मध्याह्निकः सायाह्नेगंगा
दौ देशकालौ संकीर्त्य अमुकशर्मणः मम जन्मप्रभृति अद्ययावत् ज्ञानाज्ञा
नकामाकामसकृदसकृत्कायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्ट
भुक्ताभुक्तपीतापीतसकलपातकानि उपपातकलघुपातकसंकरीकर
णमलिनीकरणअपात्रीकरणजातिभ्रंशकरप्रकीर्णकरं पातकानां मध्ये
संभावितानां पापानां निरासेन मरणकाले शरीरशुद्ध्यर्थं श्रीपरमेश्वरप्री
त्यर्थं अमुकप्रायश्चित्तं अमुकप्रत्याम्नायेन गोचोदीच्यांगसहितं यथाशक्ति प्रयो
प्रायश्चित्तं करिष्ये इति संकल्प्य॥ यानि कानि च पापानि ब्रह्महत्यासमानि ३

वा॥ केशानाश्रित्य तिष्ठंति तस्मात्केशांवपाम्यहं॥ इतिमंत्रेण शिखाकक्षो
पस्थवर्जं नखलोमानि वापयित्वा॥ प्राङ्मुखो द्वादशांगुलकाष्ठेन॥ आयु
र्बलं यशो वर्चः प्रजाः पशुवसूनि च॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो धेहि व
नस्पते॥ ॥इति दंतकाष्ठं प्राश्य॥ मुखदुर्गंधिनाशाय दंतानां च विशुद्धये॥
ष्ठीवनाय च गात्राणां कुर्वेहं दंतधावनं॥ इति मंत्रेण दंतान्संशोध्य॥ द्वा
दशगंडूषं त्यक्त्वा स्नात्वा भस्मादिस्नानं कुर्यात्॥ भस्ममादाय ईशानाय
नमः इति शिरसि॥ तत्पुरुषाय नमः इति मुखे॥ अघोराय नमः इति हृद
ये॥ वामदेवाय नमः इति गुह्ये॥ सद्योजाताय नमः इति पादयोः प्रणवेन स
र्वांगेषु॥ यद्वा॥ अग्निरिति भस्म॥ जलमिति भस्म॥ स्थलमिति भ

सर्वं तथा इदं भस्म। एवं भस्म स्नातः॥ गोमय स्नाता॥ गंध द्वारामिति गोम
यं ग्रही। गोमायुरदेति अभिमंत्रिय।

अंत्ये० ५ स्म॥ द्योमितिनस्म॥ गायत्र्या प्रोक्ष्य॥ अग्रमग्रश्चरंतीनामोषधीनां वने वने॥
तासामृषभपत्नीनां पवित्रं कायशोधनं॥ यन्मे रोगांश्च शोकांश्च नुद गोम
यसर्वदा॥ इति मंत्रेण शिरः प्रभृत्यंगानि विलिप्य॥ स्नात्वा॥ मृत्तिकास्नानं
कुर्यात्॥ वाजित्या पर्वतानामिति मृदमिंद्राघ्य॥ माद्वेरिषत्वनिति निख
नित्वा॥ स्योना पृथिवीति मृदमादाय॥ आयनते परायण इति दूर्वामादा
य॥ गायत्र्या प्रोक्ष्य॥ मृदं दूर्वां निधाय आचम्य देशकालौ स्मृत्वा॥ प्रायश्चि
त्तांग मृत्स्नानं करिष्ये इति संकल्प्य॥ मृदं कुशोदकेनाभ्युक्ष्य तनो दिक्षु
मृदं क्षिपेत्॥ अनाररमिंद्रमविनाररमिंद्रं हवेहवे सुहवं शूरमिंद्रं॥ क्रयामि प्रयो ५
शक्रं पुरुहूतमिंद्रं स्वस्ति नो मघवा धात्विंद्रः इति पूर्वतः॥ यमाय मधु

मन्तमं राज्ञे हव्यं जुहोतन॥ इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः॥
इति दक्षिणे॥ तत्त्वायामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः॥
अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः॥ इति पश्चिमतः॥
वयं सोम व्रते तव मनस्तनूषु बिभ्रतः॥ प्रजावन्तः सचेमहि॥ इत्युत्तरतः
ततः सूर्यं रोदसी उत्सेदो पावक लोक पत्नुरे॥ भोजेषस्मा अन्यु बरा सदा॥ इत्यु
परि॥ अधः पश्यस्व मोपरि संतरां पादकौ हर मा ते कशप्लकौ दृशन् स्त्री हि
ब्रह्मा बभूविथ॥ इत्यधः॥ सहस्रशीर्षा०॥ शिरसि॥ अक्षीभ्यां ते नासिका
भ्यां कर्णाभ्यां छुबुकादधि॥ यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि
ते॥ इति मुखे॥ ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्॥ यक्ष्मं

३ ततोंगेषु लिंपेत् २

१ग्रीवाभ्यां॥ ओं त्रैष्टुभेन छंदसा॥ प्रदर्शनमनस्ता भ्यांमूत्र... भाग

अंत्ये० ५ दोषण्यं मंसाभ्यां बाहुभ्यां विवृहामिते॥ इति हृदये॥ नानानानिंनआद
देश्चक्षुभ्यां स्वरूपं सचा॥ कुबेरपत्नमाउवै इति नाभ्यां॥ नमिं इमजोषस
मर्कं विनर्षिबाल्होः॥ वृक्षशिमानउजमा इति बाल्होः॥ सोमानां स्वर
णं कृणुहि ब्रह्मणस्पते॥ कक्षीवन्तं य औशिजः इति कक्षो॥ यः कुक्षिः सो
मपातमः समुद्र इव पिन्वते॥ उर्वीरापो न काकुदः इति कुक्ष्योः॥ वक्षा
नां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य॥ इषुधिः संकाः
पृतनाश्च सर्वाः॥ पृष्ठे निनद्धो जयति प्रसूत इति पृष्ठे॥ उरुभ्यां ते अष्ठी प्रयो० ५
वद्भ्यां पार्ष्णिभ्यां प्रपदाभ्यां॥ यक्ष्मं श्रोणिभ्यां भासदाद्भंससो विवृ
हामिते॥ इत्यूर्वो॥ मेहनाद्वनं करणाल्लोमभ्यस्ते नखेभ्यः॥ यक्ष्मं सर्व

स्मादात्मानस्तमिदं विवृहामि ते॥ इति जान्वोः॥ एतावानस्य महिमातो ज्या
यांश्च पूरुषः पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥ इति पादयोः॥ य
स्य विश्वानि हस्तयोः पंचक्षितीनां वसु॥ स्पाशयस्व योअस्मध्रुग दिव्येवा
शनिर्जहि॥ इति हस्तयोः॥ अंगादंगादित्यनेन सर्वांगोद्वर्तनं कार्यं॥ अं
गादंगाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि॥ यक्ष्मं सर्वस्मादात्मानस्तमिदं
विवृहामि ते॥ पुरुषसूक्तेन सर्वांगे॥ एतावत्पर्यंतो अश्वक्रांत इत्यादि भि
अंगोद्वर्तनमात्रं॥ अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे॥ शिरसा धार
यिष्यामि रक्षस्व मां पदे पदे॥ मनिलहर्वाम्रदं शिरसि निधाय मृत्तिकास्ना
नं॥ प्रक्षाल्य स्नात्वा॥ तीर्थं प्रार्थयेत्॥ हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं

अंत्ये ६

मेदेहिपाविनः॥यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः॥यन्मेमनसा
वाचाकर्मणावादुष्कृतंकृतं॥तंनइंद्रोवरुणोबृहस्पतिःसविताचपुनंतु
पुनःपुनः॥इमंमेगंगेत्युदकमालोड्य॥गंगागंगेतियोब्रू॰इतिप्रार्थ्य॥
समुद्रज्येष्ठाइतिचतसृभिः॥समुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायं
त्यनिविशमानाः॥इंद्रोयावज्रीवृषभोरराद्ताआपोदेवीरिहमामवंतु
॥याआपोदिव्याउतवास्रवंतिखनित्रिमाउतवायाःस्वयंजाः॥समुद्रा
र्थायाःशुचयःपावकास्ताआपो॰यासांराजावरुणोयातिमध्येसत्या
२ पू नृतेअवपश्यंजनानां॥मधुश्चुतःपावकास्ताआपो॰यासुराजावरुणो प्रयो
यासुसोमोविश्वेदेवायासूर्जंमदंतिवैश्वानरोयास्वग्निःप्रविष्टस्ताआ॰ ६

शुचयोयाः

आपोहिष्ठेतितिसृभिः॥तरत्समंदीधावतिधारासुतस्यांधसः॥तरत्स
मंदीधावति॥उस्रावेदवसूनांमर्तस्यदेव्यवसः॥तर॰ध्वस्रयोःपुरुषं
त्योराहस्राणिदद्महे॥तर॰आययोस्त्रिंशतंतनासहस्राणिचदद्म
हे॥तर॰सूक्तंपवमानःसुव॰सूक्तेनमार्जनंकृत्वा॥ऋतंचसत्यं॰अ
घमर्षणंकृत्वा॥प्रवाहाभिमुखस्त्रिर्मज्जयेत्॥ततःपंचगव्यस्नानंका
र्यं॥गायत्र्यागोमूत्रेण॥गंधद्वारामितिगोमयेन॥आप्यायस्वेतिदुग्धे
न॥दधिक्राव्णोअ॰इतिदध्ना॥घृतंमिमिक्षेइतिघृतेन॥देवस्यत्वेति
कुशोदकेन॥॥स्त्रीशूद्राणांअमंत्रकानिस्नानानि॥एवंदशविधस्ना
नानिविधाय॥स्नानांगतर्पणंकृत्वा॥नेच॥ब्रह्मादयोयेदेवास्तांदेवां

अंत्ये० ७ तर्पयामि॥ भूर्देवांस्तर्प० भुवर्देवांस्त० स्वर्देवांस्त० भूर्भुवस्स्वर्देवांस्त० निवीती॥
कृष्णद्वैपायनादयो ये ऋषयः॥ तानृषींस्त० भूरृषींस्त० भुवरृषीं० स्वरृ
षीं० भूर्भुवस्स्वरृषींस्त० प्राचीनावीती॥ सोमः पितृमान्यमो आंगिरसः अ
ग्निष्वात्ताः कव्यवाहनादयो ये पितरः॥ तान्पितॄंस्त० भूः पितॄंस्त० भुवः पि
तॄंस्त० स्वः पितॄंस्त० भूर्भुवःस्वः पितॄं० अग्निदग्धाश्च ये जीवा ये प्यदग्धाः
कुले मम॥ भूमौ दत्तेन तोयेन तृप्ता यांतु परां गतिं॥ इति जलांजलिं तटे
निक्षिप्य॥ यन्मया दूषितं तोयं शारीरमलसंभवात्॥ तद्दोषपरिहारार्थं
यक्ष्माणं तर्पयाम्यहं॥ इति शिखोदकं तटे निक्षिप्य॥ शुष्ककेशः धौतवा प्रयो० ७
ससी परिधाय॥ द्विराचम्य॥ विष्णूद्देशे त्रिंशाधिकान्युग्मान्ब्राह्मणा

न्पूजापूर्वकं भोजयेत्॥ आमान्नं वा दद्यात्॥ इदमेव श्राद्धं त्रिंशांगं विष्णु
श्राद्धमित्यभिधीयते॥ ततो गवामंगेषु तिष्ठंति भुवनानि चतुर्दश॥ य
स्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च॥ इति मंत्रेण आदि गोदानं प्रत्य
क्षं निष्क्रयद्वारा वा कुर्यात्॥ ततो ग्निस्थापनादि पूर्वकं आज्येन व्याहृति
भिः पापहर विष्णुदेशेन अष्टोत्तरशतमष्टाविंशतिं वा कृत्वा॥ ततः पं
चगव्यं कार्यं॥ सुवर्णादिपात्रे पद्मादिपात्रे वा॥ ताम्राया गोमूत्रं त्रिफ
पलं॥ गायत्र्या प्रणवेनादाय॥ ततो गुष्ठार्धपरिमितिं श्वेताया गोमयं
गंधद्वारामित्यादाय॥ ततः कपिलायाः पयः सप्तपलं आप्यायस्वे
त्यादाय ततो नीलायाः सप्तपलमेव दधि॥ दधिक्राव्ण इत्यादाय॥

५ ब्रलग ८०५

अंत्ये० ८ ततोनीलायाः ॥ ततः कृष्णायाः घृतमेकपलं ॥ घृतं मिमिक्ष इत्यादाय ॥ प्रण
वेनालोड्य ॥ प्रणवेनैव यज्ञकाष्ठेन निर्मथ्य प्रणवेनाभिमंत्र्य त्रिभिस्तु
भिर्वा सप्तपात्रैः हरितैः कुशैः दशाहुतीर्जुहुयादेभिर्मंत्रैः ॥ इरावतीधे
नुमती० स्वाहा ॥ पृथिव्या इदं ॥ १ ॥ इदं विष्णुर्वि० स्वाहा ॥ विष्णव इदं २
मानस्तोके० स्वाहा ॥ रुद्रायेदं ३ ब्रह्मजज्ञानं० स्वाहा ॥ ४ ॥ अग्नये स्वाहा
अग्नय ॥ ५ ॥ सोमाय स्वाहा सोमायेदं ॥ ६ ॥ तत्सवितुर्वरेण्यं० सूर्यायेदं.
७ ॥ ॐ स्वाहा ॥ प्रजापतय ॥ ८ ॥ ॐ भूर्भुवः स्वः स्वाहा प्रजापतय ॥ ९ ॥ अ प्रयो० ८
ग्नये स्विष्टकृते स्वाहा अग्नये स्विष्टकृत ॥ १० ॥ इति दशाहुतीर्हुत्वा ब्र
ह्मणं करिष्य इति द्विजान्पृष्ट्वा ॥ तैः कुरुष्वेत्यनुज्ञातः प्रणवेन स

र्वैः पंचगव्यं पिबेत् ॥ एतच्च यामाद्बहिर्नद्यादेस्तीरे तत्र दर्शनं कार्यं ॥ अशक्त
स्य गोमूत्रादि स्वल्पं ग्राह्यं सर्वस्य पेयत्वात् ॥ अस्मिन्दिने शक्तश्चेत्तूपवासः ॥
अशक्तस्य हविष्याशनं ॥ ततः संध्यायां गृहे आगत्य विष्णुं स्मरन् मौनी
निशामतिवाह्य ॥ प्रक्रांतं प्रायश्चित्तं संकल्पानुसारेण प्रत्याम्नायद्वारा
कृत्वा ॥ उत्तरांगानि कुर्यात् ॥ व्याहृतिभिराज्यं पूर्ववद्धुत्वा ॥ पूर्ववत्पुनः
प्रायश्चित्तांगं विष्णुश्राद्धं कृत्वा ततो गोदानं पूर्ववच्चरेत् ॥ एवं प्रायश्चित्तं
दा२ कृत्वा शक्तौ सत्यां दशदानान्यपि कुर्यात् ॥ दानानि च ॥ गोभूतिलहिरण्या
ज्यं वासो धान्यं गुडानि च ॥ रौप्यं लवणमित्याहुर्दशदानान्यपक्रमात् ॥
तत्र ॥ गवामंगेषु ॥ गावो अग्रतः ॥ गवामंगेषु तिष्ठंति भुवनानि चतु

१ गावोमेअग्रतःसंतु गावोमेसंतुपृष्ठतः।।गावोमेहृदयेसंतुगवांमध्ये [illegible]

अत्यें ईशा।।यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच।। गोदेयं।।सर्वभूताश्रयाभू
९ मिवराहेणसमुद्धृता।।अनंतसस्यफलदा अतः शांतिंप्रयच्छमे।।अने
नन्दः महर्षेर्गोत्रसंभूताः कश्यपस्यतिलाः स्मृताः।।तस्मादेषां प्रदाने
नममपापंव्यपोहतु।।इतितिलाः।।हिरण्यगर्भगर्भस्थं इतिहिरण्यं।।
कामधेनुसमुद्भूतं सर्वक्रतुषुसंस्थितं।। देवानामाज्यमाहार अतः शां
तिंप्रयच्छमे।।इत्याज्यं।।शरणंसर्वलोकानांलज्जायालक्षणंपरं।।सु
वेषधारणंवस्त्रमतः शांतिंप्रयच्छमे।।वस्त्रं।।सर्वदेवमयंधान्यंसर्वोत्प प्रयो
त्तिकरंमहत्।।प्राणिनांजीवनोपायमत० इतिधान्यं।।यथादेवेषुवि ९
श्वात्माप्रवरश्चजनार्दनः।।सामवेदस्तुवेदानां महादेवस्तुयोगिनां।।प्र

णवः सर्वमंत्राणांनारीणांपार्वतीयथा।।तथारसानांप्रवरः सदैवेक्षुर
सोमतः।।ममतस्मात्परांलक्ष्मींददस्वगुडसर्वदा।।इतिगुडं।।प्रीतिर्यतः
पितृणांचविष्णुशंकरयोः सदा।।शिवनेत्रोद्भवं रौप्यं अतः शांतिं०
इतिरौप्यं।।यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणंविना।।शंभोःप्रीतिकरं
नित्यंमतः० लवणं।। इतिदशदानानिदत्वाविष्णुंस्मरेत्।।एतानिदश
दानानिसभ्यस्यएव।। तत्संनवेअन्येभ्योपि।। ततः यन्मयाकृतं अमु
कप्रायश्चित्तंतदच्छिद्रमस्त्विति कर्तृके आच्छिद्रमस्त्विति ब्राह्मणाः
प्रीतिब्रूयाः यथा।।व्रतच्छिद्रंतपच्छिद्रंमच्छिद्रंयज्ञकर्मणि।।सर्वंभवतुमे
छिद्रंयस्यचेच्छंतिवैद्विजाः।।इतिप्रतिवचनं।।एतत्प्रायश्चित्तमकृत्वैव

अंत्ये० १० यदि पित्रादि मृतिस्तदा पातकमज्ञात्वानिश्चय पुत्रादिनाइदमवश्यंकार्यं॥ अ
निश्चयेनावश्यकं॥ पुत्रादिनाकरणे पंचगव्यप्राशनाभावः॥ मरणानंतरं
चतुर्थ्यौच्छिष्टाधरोच्छिष्टउभयोच्छिष्टस्पृष्टास्पृष्टमरणखड्गमरणबंधन
मरणादिषु सप्तु जीषट्द्वादशपंचदशवाब्दकृच्छ्रान्प्रायश्चित्तंनिमित्तानु
सारेणब्राह्मणवचनाद्गृहीत्वाशक्तौ नदैवतत्प्रत्याम्नायतयाहिरण्यादिद
त्वाशुद्धिंसंपाद्यदहनानिकुर्यात्॥ शक्ताभक्तापुत्रादयः पित्रादेः पापीनः
सर्वान्त्यनाशुद्धिछवः प्रायश्चित्तेषन्यतमंकृत्वा दहनानि कुर्युः॥ एवंकर्त्रा प्रयो० १०
प्यधिकाराभावेशक्त्याऽब्दादिकृच्छ्ररूपंशुद्धिमात्मनः संकल्पेन नदैवा
वा प्रत्याम्नायेन संपाद्यदहनादिकुर्यात्॥ अन्यथा व्यर्थमेव तिसर्वं॥ अ

थोत्क्रांतिधेनुं दरिद्राय कुटुंबिने श्रोत्रियाय ब्राह्मणाय दद्यात्॥ अद्येत्या
दिकालं स्मृत्वा अमुकगोत्रस्यामुकशर्मणो मम सुखेन प्राणोत्क्रमणप्र
तिबंधकोत्क्रान्तिकृत्यनुक्तनिष्कृतिसकलपातकक्षयद्वारासुखप्राणो
त्क्रमणार्थं यथाशक्त्यलंकृतामिमामुत्क्रांतिधेनुं रुद्रदैवत्याममुकगो
त्रायामुकशर्मणे तुभ्यमहं संप्रददे॥ गवामंगेषु इति मंत्रमुक्त्वा दद्यात्
पित्रादेरशक्तौ पुत्रादिर्दद्यात्॥ तत्र ममेति पदस्थाने पित्रादेरितिव
देदिति विशेषः॥ ॥ धेन्वभावे प्रत्याम्नायत्वेन द्रव्यं दद्यात्॥ ॥ ततो वैत
रणीदानं॥ आचम्य प्राणानायम्य देशकालौ स्मृत्वा पूर्ववन्ममेत्यंतमु
क्त्वा यमद्वारस्थितवैतरण्याख्यनद्युत्तारणार्थं गोदानमहं करिष्ये॥ ब्रा

अंत्ये० ११ स्मर्णं कृत्वा ॥ पादप्रक्षालनगंधमाल्यवस्त्रादिभिः ॥ यथाशक्त्याभ्यर्च्य तथ
स्ते शिवाः आपः संतु ॥ सौमनस्यमस्तु ॥ अक्षतं चारिष्टं चास्तु ॥ यच्छ्रेय
स्तदस्तु ॥ यत्पापं तत्प्रतिहतमस्तु ॥ [illegible]कृत्वा धेनुं प्रार्थ्य ॥ धेनुके त्वं
प्रतीक्षस्व यमद्वारे महापथे ॥ उत्तितीर्षु रहं देवि वैतरण्यै नमोस्तु
ते ॥ द्विजं प्रार्थ्य ॥ विष्णुरूप द्विजश्रेष्ठ भूदेव द्विजपावन ॥ तर्तुं वैतर
णीमेनां कृष्णां गां प्रददाम्यहं ॥ अद्येत्यादि वैतरणीसंतरणाय इमां गां
कृष्णवस्त्ररक्तमाल्यालंकृतां यथाशक्ति सदक्षिणां तुभ्यं संप्र
ददे ॥ ॐ यमद्वारे पथे घोरे या सा वैतरणी नदी ॥ तां ततुं कामो य प्रयो० ११
च्छामि कृष्णां वैतरणीं तु गां ॥ नमस्कृत्वा विप्रहस्ते जलं क्षिपेत् ॥

पापप्रशमनार्थं तिलपात्रदानं करिष्ये ॥ विप्रस्य पाद ॥ ५

कृष्णाया अभावे अन्यवर्णापि देया ॥ गोरभावे द्रव्यं देयं ॥ तस्या शक्तौ पुत्रा
दिर्दद्यात् ॥ अत्र आद्ये मंत्रे उत्तितीर्षु रयमिति पठेत् ॥ द्वितीये तर्तु वैतर
णीमस्य तृतीये तां ततुंमस्येति ॥ ॥ ततः तिलपात्रदानं ॥ यथाशक्तिकां
स्यपात्रे तिलादि क्षिप्त्वा सुवर्णं वा ॥ अद्येत्यादि जन्मप्रभृति मरणांतकृ
तनानाविधप्रक्षालनगंधमाल्यादि पूजां यथाशक्ति कृत्वा मम जन्मप्र
भृति मरणांतं नानाविधपापप्रशमनार्थं तिलपात्रं सदक्षिणं अमुकगो
त्रायामुकशर्मणे तुभ्यं संप्रददे ॥ तिलाः पुण्याः पवित्राश्च तिलाः सर्वक
रास्मृता ॥ शुक्ला वा यदि वा कृष्णा ऋषिगोत्रसमुद्भवाः ॥ यानि का
नि च पापानि ब्रह्महत्यासमानि च ॥ तिलपात्रप्रदानेन तानि नश्यंतु सर्व

अंत्ये० १२ दा॥ महर्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः॥ यस्मात्तेषां प्रदानेन मम पापं व्यपो
हतु॥ नम मेति विप्रहस्तेन लं क्षिपेत्॥ पुत्रादिस्तु अस्य पापं व्यपोहत्विति वदेत्
यथा अयं मंत्रः॥ यो देवपितृरूपेण हव्यकव्यभुगव्ययः॥ तिलपात्रप्रदानेन मम
मे विष्णुः प्रसीदतु॥ इति दाता नरे सोस्य विष्णुरिति पठेत्॥ एतन्मंत्रपक्षे विष्णुप्री
तिरेव फलत्वेनोक्तिरेव॥ ततो गोमयेनोपलिप्तभूमौ कुशोपरि उपविष्टः द
क्षिणाशिराः शायीतो मातुलस्योर्ध्वपुंड्रं गंगामृत्तिकादि पवित्रैरलंकृतः परमेश्व
जे४ रं स्मरन्॥ पुत्रो सैंधा[illegible]शिरो रक्षेत्॥ ततः अद्येत्यादि अमृतत्वप्राप्तिकामन
यायुण्यासूक्तादि पाठमहं करिष्ये॥ नानानं वा मिति सूक्तस्य शिशुरांगिरस त्रयो १२
ऋषिः॥ पवमानः सोमो देवता॥ पंक्तिः [illegible] अमृतत्वप्राप्तये जपे विनियोगः॥
ॐ नानानं वा उ नो धियो विव्रतानि जनानां॥ तक्षा रिष्टं रुतं भिषग् [illegible] ब्रह्मा सु

त४

5

त२ र२ व५

न्वंतमिछती द्रायेदो परिस्रव॥ जरतीभिरोषधीभिः पर्णेभिः शकुनानां॥ कार्मारो अश्म
भिर्द्युभिर्हिरण्यवंतमिछती॥ द्रायेंदो परिस्रव॥ कारुरहं ततो भिषगुपलप्रक्षिणी नना॥ त२
नानाधियो वसूयवोनु गा इव तस्थिम इंद्रायेंदो० अश्वो वोल्हा सुखं रथं हसनामुप
मंत्रिणः॥ शेपो रोमण्वंतौ भेदौ वारिन्मंडूक इछतींद्रायें० शर्यणावति सोममिंद्रः
पिबतु वृत्रहा॥ बलं दधान आत्मनि करिष्यन्वीर्यं महदिं० आ पवस्व दिशां पत आर्जी आ५
कात्सोम मीढ्वः॥ ऋतवाकेन सत्येन श्रद्धया तपसा सुत इंद्रा० पर्जन्यवृद्धं महिषं
तं सूर्यस्य दुहिताभरत्॥ तं गंधर्वाः प्रत्यगृभ्णन् तं सोमे रसमादधुरिंद्रा० ऋ
तं वदन्नृतद्युम्न सत्यं वदन्सत्यकर्मन्॥ श्रद्धां वदन्सोम राजन्धात्रा सोम परि
ष्कृत इंद्रा०॥ सत्यमुग्रस्य बृहतः संस्रवंति संस्रवाः॥ संयंति रसिनो रसाः पु

दिविह॥ यत्र लोकास्तनूत्यजः० यत्र देवा महात्मानः० यत्र तत्परमं पदं० यत्र तत्परमाव्ययं०
यत्र गंगा च यमुना च० ५७ ऋच ५ दिविजः॥

अंत्ये० नानीब्रह्मणा दर्श०॥ यत्र ब्रह्मा पवमान छंदस्यां ३ वाचं वदन्॥ ग्रा-
१३ वणा सोमे महीयते सोमेनानंदं जनयन्निंद्राये०॥ यत्र ज्योतिरजस्रं यस्मिंल्लोके
स्वर्हितं॥ तस्मिन्मां धेहि पवमानामृते लोके अक्षित इंद्रा० यत्र राजा वैवस्वतो य
त्रावरोधनं दिवः॥ यत्रामूर्यह्वतीरापस्तत्र माममृतं कृधी०॥ यत्रानुकामं च
रणं त्रिनाके त्रिदिवे दिवः॥ लोका यत्र ज्योतिष्मंतस्तत्र माममृतं कृधी इं०
यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपं॥ स्वधा च यत्र तृप्तिश्च तत्र माममृतं
धीइं०॥ यत्रानंदाश्च मोदाश्च मुदः प्रमुद आसते॥ कामस्य यत्राप्ताः कामा प्रयो
स्तत्र०॥ यत्र तत्परमं पदं विष्णोर्लोके महीयते॥ देवैः सुकृतकर्मभिस्तत्र० मा- १३
यत्र तत्परमाव्ययं भूतानामधिपतिं॥ भावना विचयो गीश्च तत्र मा० यत्र लो
कास्तनूत्यजः स्नु यातपसा जिता॥ तेजस्वी यत्र ब्रह्म च तत्र० यत्र देवा म

दिविजः ऋच ५ यत्र तद्विष्णुर्महीयते० ५६-

हात्मानः सेंद्राश्च मरुद्गणाः॥ ब्रह्मा च यत्र विष्णुश्च तत्र०॥ यत्र गंगा च यमुना च
यत्र प्राची सरस्वती॥ यत्र सोमेश्वरो देवस्तत्र० यइंद्रौहोः पवमानस्यानुधाम
न्यक्रमीत्॥ नमाक्रः स्तु प्रजा इति यस्ते सोमा विधन्मन इंद्रा०॥ ऋषे मंत्रकृ
तां स्तोमैः कश्यपोद्वर्धयन् गिरः॥ सोमं नमस्य राजानं यो जज्ञे वीरु
धांपतिरिं०॥ सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः॥ देवा आदित्या ये ऋ ५
सप्त तेभिः सोमाभिरक्षन इंद्रा०॥ यत्ते राजंछृतं हविस्तेन सोमाभिरक्षि
नः॥ अरातीवा मा नस्तारीन्मो च नः किंचनाममदिंद्रा० ततः नानामित्यादि न ३
सूक्तं स्वयं जपेत्॥ अन्यांश्चावयेत्॥ नानानमिति सूक्तं तु अंतकाले सदा
पठेत्॥ जप्त्वा चैव परं स्थानं अमृतत्वं च गच्छति॥ ॥इति ऋग्विधानवचनात्

ततःउपनिषद्भागानन्यानिचपुरुषसूक्तानिगीतास्तोत्राणिच॥ सहस्रनामा-
दीनिपठेत्सकलपापमोचनार्थं पुरुषसूक्तंपावमानंपठेच्छृणुयाद्वा श्रोतुः
संकल्पाशक्तौ श्रावयिताऽमुकशर्मणोऽमुकफलप्राप्तयेऽमुकंश्रावयिष्य
इतिसंकल्पयेत्॥ श्रीरामादीश्रवणंचकार्यं॥ ॥प्राणोत्क्रमणानंतरं
चानुजः सजातीयाब्राह्मणादयअनन्यामुक्तकेशाः शवं प्रछादितमु
खंप्राक्शिरसमूर्ध्वमुखंदाहदेशंप्रतिनयेयुः॥ अग्निस्मार्ताग्निः अ
ग्रतोवाश्रौतः शवायित्येननेतव्याः प्रेताग्निमध्येऽन्येनगंतव्यं॥ सर्वेबां
धवाः अधः कृतोपवीताअप्रावरणामुक्तकेशाः हृद्धापुरः सराः॥ प्रेत
मनुगच्छेयुः॥ यदिगृहेमृतस्तर्हिब्राह्मणोनगरपश्चिमद्वारेणनेयाः

क्षत्रियउत्तरद्वारेणवैश्यः पूर्वेण॥ शूद्रोदक्षिणेनदाहदेशस्तुग्रामादाग्ने
य्यांनैर्ऋत्यांवामध्यो ततः सर्वतोनग्नोनावरणः बद्धलोषधिश्च॥ तंदेशं
प्राप्यशवमर्वागेवनिधायतद्देशात्कंटकादीनिसमूलानिमपास्येत्॥ ॥
ततःकर्त्तादेशकालौसंकीर्त्यपित्रादेरूर्ध्वोच्छिष्टाधरोच्छिष्टोनयोच्छिष्टस्पृ
ष्टास्पृष्टमरणखट्वामरणादिजनितप्रत्यवायपरिहारार्थंपंचदशावादश
षड्वात्रीन्वाकृच्छ्रान्यथाशक्तिप्रायश्चित्तममुकप्रत्याम्नायेनसद्यः सूतकां
तेवाकरिष्यइतिसंकल्प्यशक्तौतदेवइत्यादिनाअशक्तौसूतकांतेवाकुर्या
त्॥ ॥ततःकर्त्ताप्यात्मशुद्ध्यैदेशकालौस्मृत्वाआत्मशुद्धिद्वारापित्रादेरौ
र्ध्वदेहिकाधिकारसिद्ध्यर्थंशक्त्याएतावदेवकृच्छ्रत्रयंवाप्रायश्चित्तंकरि

अंत्ये० १५ ष्येइतिसंकल्प्य॥तदैवस्नानकांतेवाकुर्यात्॥ततःकर्त्ताअन्येचपुत्राकक्षोपस्थव
र्जंलोमरनखादिवापयेयुः॥कर्त्रतिरिक्तानांदशमेह्निवापनंयथाचारंकर्तुश्चकु
र्दशेह्निमतांतरिमृतेपत्न्याआद्येह्निदशमेह्निवापनंयथाचारंकार्यं॥ततःकर्ता
त्रि र: ४ अहतेनप्रत्यग्रयेणवाससात्रिभिर्नागैः॥प्रभृतिअंगुलिपर्यंतंपादतलवर्जं
आकृष्णिरसंप्रेतमाछाद्यचतुर्भागंतस्यछित्वा॥तेनात्मनउत्तरीयंकुर्यात्॥
द्वादशाहांतेप्रेत्यकृत्येतदेवधार्यं॥ततोदहनदेशानोवायव्यांदिशिस्मार्ताग्नि
र्निदध्यात्॥यदिविछिन्नोग्नीस्त्रियतेतत्विछेदस्तावत्कालंगणनयाग्निविछे प्रयो० १५
दप्रायश्चित्तंतदैवकुर्यात्संकल्पयेद्वा॥तत्रनास्तिक्यादग्नित्यागेमासद्वयेपका
र्यं॥मासचतुष्टयेतिकृच्छ्रः षण्मासोर्ध्वंचांद्रादिषेकं॥संवत्सरादूर्ध्वंत्रैमा

सिकंद्वैमासिकंवा॥आलस्यादिनाग्नित्यागेतुद्वादशाहातिक्रमेत्र्यहमुपवासः॥
मासातिक्रमेद्वादशाहमुपवासः॥संवत्सरातिक्रमेमासोपवासः पयोभक्षणं
वा॥प्रमादादग्नित्यागेआत्रिरात्राद्दशलघुप्राणायामः॥आषडाच्चतुर्विंशति॥
आद्वादशाहात्पंचाशत्॥आविंशत्पहाच्छतं॥आमासाउपवासः॥आद्विमासात्त्रिरा
त्रंसंवत्सरात्कार्यं॥अतःपरंप्रत्यहंकार्यं॥संवत्सरोर्ध्वमग्नित्यागेचांद्रं॥द्विवर्षत्या
६४ गेचांद्रसोमायनंच॥॥नांऽद्वयंवा॥त्रिवर्षत्यागेकृच्छ्रछंगोदानंचेत्यादि॥अत्रप्रत्या
म्नायाः कल्प्याः यावत्कालंविछेदस्तावदाहुतिपरिमितहोमद्रव्यंचदद्यात्॥त
तःप्राणायामोअमंत्रकः॥एवंसर्वप्रेतकृत्येपुनर्वप्रेत्यतकृत्यंप्राचीनावीतिनाका
र्यंदक्षिणापवर्गंच॥ततःकालंस्मृत्वाअमुकशर्मणोग्निविछेदकनिमित्तकंदा

अंत्ये० हायाग्निसिध्यर्थं वप्रेताधानं करिष्ये इति संकल्प्य॥ पालाशोदुंबराश्वत्थशमीवैकंकतो
१६ द्भुजं॥ वल्मिको खर वाराह मुखको त्खात मृत्तिका॥ वालुका सिकता हस्ता शनि ध्वस्त
तरुत्वचः॥ यथालाभमेनान्संभारान्संपाद्य तेषु लौकिकाग्निं प्रतिष्ठाप्य॥ अयाश्चे
ति४ ति विमदऋषिः अयाग्निर्देवता पंक्तिश्छंदः॥ लौकिकस्याग्नेरोपासनत्वसिध्यर्थे आ
ज्यहोमे विनियोगः॥ अयाश्चेत्यनया एकामाज्याहुतिं जुहुयात्॥ अयाश्चाग्नेस्य न
भिशस्तिश्च सत्यमित्वमया असि॥ आयासा वयसा हव्यो यासं हव्यमूहिषे या नो धे
हि भेषजं स्वाहा॥ अयसे त्वयदं॥ यस्याग्नयो जुहुतो मास सकामाः संकल्प्य यं निते घ्रयो
यजमानं॥ ध्यायंतु तेह हविषे सा हितायास्वर्गलोकमिमं प्रेतं नयंतु स्वाहा॥ स्वरिदं १६
न ममेत्य प्राहुतिं केचिदाहुः॥ आहिताग्निरेवेमाम परे॥ ततो व्याहृति

चतुष्टयं च जुहुयात्॥ एवमौपासनसिद्धो भवति॥ पत्नीमरणेप्येवं॥ ॥निरग्नि
कस्य ब्रह्मचर्यादेर्निरग्निकाय वा कपालाग्निः अग्निवर्णं कपालं तु हुत्वा तत्र वि
निक्षिपेत्॥ करीषाद्दितेनोयस्तु जातः स तु कपालजः॥ अनुपनीता विवाहयोर
प्येवं॥ विधवाविधुरयोरुत्तपनीयमः॥ दर्भैरग्निस्तु प्रज्वाल्य पुनर्दर्भैस्तु संयु
तः पुनर्दर्भैर्हुतीयाग्निरेष उत्तपनीयकः कपालाग्निरेव वा॥ लौकिकेन सर्वे पादा
हः आहिताग्नेर्वैतानाग्निभिः ततः पूर्वोक्ते दाहदेशे आग्नेय्यां नैर्ऋत्यां वा ऊर्ध्व
बाहुनरायाममीशान नैर्ऋत्यायतं पंचारत्नि तिर्यगायतं द्वादशांगुलमधः
खातं दक्षिणाप्रवणं आग्नेयी अप्रवणं गर्तं खानयेत्॥ तस्य वायव्यामग्ने निधानं॥
दाहगर्तादीशान्ये जानुमात्रं वितस्तिमात्रं वा गर्तं हुत्वा तत्राशका रौ वा लौ उद

अंत्ये० १७ कंचनिक्षिपेत्॥ इदं गर्त्तेकिंदे नाम॥ अथप्रेतस्य मृज्जलाभ्यामलंक्षालयित्वा स्नापयि
त्वा तिलकादी कारयीता वस्त्रं परिधायजवामांस्यानुलिप्यनलदमालां प्रतिमुंचेत्॥
नलदानाबेतन्म्यतिनिधिजपांके विदाऊः॥ ततः कर्त्ता पादौ प्रक्षाल्याचम्य॥ अमं
त्रकं प्राणायामं कृत्वा॥ अद्येत्यादि देशकालौ स्मृत्वा॥ अमुकगोत्रस्यामुकशर्म
णो ऽस्मित्पित्रादेः प्रेतस्य प्रेतत्वविमोक्षार्थं और्ध्वदेहिकं करिष्ये इति संकल्प्य॥ प्र
तस्य प्रेतत्वविमोक्षार्थं और्ध्वदेहिकं करिष्ये इति संकल्प्य॥ प्रेतस्य श्मश्रुलोमन
खानि वापयित्वा॥ नलदेनानुलिंपतिनलदमालां प्रमुंचंतिनिः पुरीषं कृत्वा इष प्रयो० १७
दाज्यं च संपादयेत्॥ अपुजः सपुगोपुक्ता वा कटेन प्रेतं यंति लगति स्मार्त्तस्येत्॥
प्रावीता वीति भूमिं प्रार्थयेत्॥ उपसर्पेति मंत्रस्य संकुसुक ऋषिः पितृमेधो देवता।

त्रिष्टुप् छंदः भूमिप्रार्थने विनियोगः॥ उपसर्प मातरं भूमिमेतामुरुव्यचसं पृ
थिवीं सुशेवां॥ ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात्॥
ते २ अपसर्पंतु प्रेताये केचिदिह पूर्वजाः॥ स्वस्तिनः कृण्वतमा ऋषातः पुनरागम
त्॥ दिवि जाता अप्सु जाता या जाता ओषधीभ्यः॥ अथो या अग्निजाता अपः॥
त्वा नः शुंधंतु शुंधनीः॥ इति भूमिं प्रोक्षणे दित्यने॥ अन्ये तु अपसर्पंते ति मं
त्रेण भूम्यनुमंत्रणं॥ दिविजाता इत्यनेन च स्थलसंशुद्धिरित्याहुः॥ ततः शमी
शाखयोदकेन च स्थानं त्रिः परिव्रजन् प्रोक्षेद्यपेनेति मंत्रांते॥ अपेतवीति मंत्र
स्य यम ऋषिः पितरो देवता त्रिष्टुप् छंदः भूमिप्रोक्षणे विनि० अपेतवीतवि च
सर्पतातो ऽस्मा एतं पितरो लोकमक्रन्॥ अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्व

त्सवसानमस्मै॥ गर्तोदकेन प्रोक्षेदित्यन्ये॥ ततो यमाय दहनपतये चोल्लिखामि॥
कालाय दहनपतये चोल्लिखामि॥ मृत्यवे दहनपतये चोल्लिखामि॥ इति मंत्र
त्रयेण रेखात्रयमायसेनोल्लिखेत्॥ ततः खाते हिरण्यशकलानि तिलांश्च प्रक्षि
प्य तिलोदकं क्षिपेत्॥ यमाय दहनपतये पितृभ्यः स्वधा नम इति मध्ये॥ काला
य दहनपतये पितृभ्यः स्वधा नम इत्युत्तरतः॥ मृत्यवे दहनपतये पितृभ्यः स्व
धा नम इति दक्षिणतः॥ केचिच्छ्वोहलेखनं न कुर्वंति प्रेतास्ये तिलान्प्रक्षिप्त्वा
सजातीयाहुतिर्यद्वितियैः काष्ठैरेव दहनपर्याप्तां चितिं कारयेत्॥ तदुपरि ब
र्हिरास्तीर्य तदुपरि कृष्णाजिनमूर्ध्वलोमस्तृणीयात् प्रेतस्योत्तरतः पत्नीं
संवेशयेत्॥ ततः प्रेतमग्नेरुत्तरेणानीता दक्षिणशिरसं चितौ निवेशयेत्

तान्देवरः शिष्यो वा जरद्दासो वोत्थापयेत्॥ उदीर्ष्वेति मंत्रेण दासपक्षे कर्तुर्मंत्रपा
ठो न तु तस्य॥ उदीर्ष्वेति संकुसुकः पितृमेधास्त्रिष्टुप्॥ उदीर्ष्व नार्यभि जीवलोकं
गतासुमेतमुपशेष एहि॥ हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभिसंबभू
थ॥ ततः कर्ता प्रेतस्य मुखनासिकाद्वये चक्षुर्द्वये श्रोत्रद्वये एवं सप्तसु छिद्रेषु हिर
ण्यशकलानि क्षिप्त्वा॥ तदभावे आज्यबिंदून्वा॥ प्रेतशरीरे धानाकांस्तिलान्प्रक्षिप्य
अग्निं परिसमुह्य चितिमहितामग्निं परिस्तीर्य दक्षिणतोऽग्नेः पर्युक्ष्य॥ स्रुवं चमस
माज्यभाजनं चेति पात्राण्यासादयेत्॥ ततो गर्तोदकं चमसे आसिच्य दर्भैः प्रच्छाद्य प्र
णायेत्॥ पूर्णकुम्भ चमस इति॥ कारिकायां तूक्तं उत्तरतः पात्रासादनं चमसप्रणय
नं च॥ उद्धृत्य माज्यं बर्हिष्यो पकल्पयेत्॥ इममग्न इति दमनोऽग्नि स्त्रिष्टुप् चमसानु

अंत्ये॰ १९ मंत्रणेवि॰ ॐ इमंमग्नेचमसंमाविजिह्वरः प्रियोदेवानामुतसोम्यानां॥एषयश्चमसो
देवपानस्तस्मिन्देवाअमृतामादयंते॥ दर्शस्थापितचमसानुमंत्रणंकुर्यात्॥ततःकृ
ष्णपक्षेअहर्मरणेप्रातराहुतिमारभ्य॥रात्रिमरणेसायमाहुतिमारभ्ययक्षत्तोमर
न्मरणदिनादर्शपर्यंतंदिनसंख्ययाचतत्रैस्वचतस्वआहुतीर्जुहुयात्॥ दर्शस्था
लीपाकंचकुर्यात्॥शुक्लपक्षमरणेरात्रिमृतस्यप्रातराहुतीर्जुहुयात्॥ प्रथमे
प्रेतोपासनं॥अद्येत्यादि॰ प्रेतोपासनंकरिष्यइतिसंकल्प्य॥समिद्द्वयमादाय॥ प्रयो
अग्निंकामंलोकंअनुमतिंएताःप्रधानदेवता॥अस्मावाज्येनयक्ष्ये॥प्रेतंप्रेतोरसि १९
आज्येन॥ यथाष्टषदाज्येनयक्ष्ये॥जुहुधिस्वाहास्वाहेतिसमिद्वयंजुहुयात्॥प्रजा
पतयइदंनममेतित्यागः॥परिसमुह्यचितिसहितमग्निंपरिस्तीर्यपर्युक्ष्य॥तूष्णीं

नि

आज्यंउत्पूयस्रुवंसमृज्यतूष्णीं अग्निमलंकृत्यवामंजानुंपातयित्वाप्राचीना
वीतिस्रुवेणजुहुयात्॥ ॐ अग्नयेस्वाहा॥अग्नयइदंनममेतित्यागः॥ए
वमुत्तरत्रकामायस्वाहा॥लोकायस्वाहेत्यस्मावाज्येन॥अस्माद्वैत्वमजाय
था॥अयंत्वधिजायतां॥असौस्वर्गायलोकायस्वाहेतिप्रेतस्योरसिप्रवदाज्ये
न॥असौइतिपदस्थानेपुंसःस्त्रियावाप्रेतस्यनामनिर्दिशेत्॥स्विष्टकृदादि
नास्तिपात्रयोजनंनास्ति॥ ततःसक्तुपिष्टेनापूपंकृत्वापृषदाज्येनाभिघार्यत
दवयवपिंडान्प्रेतस्यललाटेमुखेबाहुद्वयेहृदयेचेतिपंचसुस्थलेषुदद्यात्
ततोग्नेर्वर्मेतिमन्त्रेणाग्निस्त्रिष्टुप्॥अपूपपिंडदानेवि॰॥अग्नेर्वर्मपरिगोभिर्व्य
यस्वसंप्रोर्णुष्वपीवसामेदसाच॥नेत्वाधृष्णुर्हरसाजर्हृषाणोदधृग्विधक्ष्यन्

अंत्ये० यंखयति॥ इति ललाटे मुखे अपूप्यपिंडं दत्वा॥ वा स्कादौ॥ अतिद्रवेति मंत्रस्य य
२० मश्वानौ त्रिष्टुप् पिंडदाने विनियो० अतिद्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ
साधुना पथा॥ अथा पितॄन्सुविदत्रां उपेहि यमेन ये सधमादं मदंति॥१॥ यौ ६२
ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ॥ पिंडं ताभ्यामेनं परि
देहि राजन्स्वस्ति चास्मा अनमीवं च धेहि॥२॥ पिंडदानं केचित्प्रेतोपासना ५रु.दये
त्पूर्वं कुर्वंति॥ अन्ये तु नैव कुर्वंति॥ ततः क्रव्यादमग्निमिति यमोग्निस्त्रिष्टु
प्॥ अग्निप्रज्वालने वि० क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः॥
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्॥ इत्यग्निं प्रज्वालयेत्॥ पुं २०
सः शिरोदेशे स्त्रियाः पाददेशे॥ इत्यप्याहुः॥ ततः वातास्ते वांतु पयिनिपु

पयगंधमानः सुखागात्र सुखानुलोमाः॥ त्वचः सुखामांस सुखा अस्थिसौ
ख्या वहंतु त्वा मरुतः सुकृतां यत्र लोकाः॥ इमा आपो मधुमत्यो स्मिंलोके उपदु
हंतामक्षीयमाणाः स्वधा नमः॥ इमा आपो मधुमत्योंतरिक्षे लोके उपदुहंताम
क्षीयमाणाः स्वधा नमः॥ इमा आपो मधुमत्यः स्वर्गे लोके उपदुहंतामक्षीयमा
णाः स्वधा नमः॥ इति मंत्रैर्वस्त्रपल्लवेन सिंचेद्वायुः कार्य इति केचित्॥ ततो
दह्यमानं प्रेतमनुमंत्रयीत एतैर्मंत्रैः॥ प्रेहि प्रेहीति द्वयोर्यमः पितरस्त्रिष्टुप्
दह्यमानप्रेतानुमंत्रणे वि० प्रेहि प्रेहि पथिभिः पूर्वेभिर्यत्रानः पूर्वे पित
रः परेयुः॥ उभा राजाना स्वधया मदंता यमं पश्यासि वरुणं च देवं॥ संगच्छस्व
पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन्॥ हित्वायावद्यं पुनरस्तमेहि संगच्छ

अंत्ये॰
२१

स्वतन्वासुवर्चाः। अतिद्रवेति मंत्रद्वयोर्मन्त्रश्वानौ त्रिष्टुप्॥ दह्यमानप्रेतानुमंत्र
णे वि॰ अतिद्रवसारमेयौश्वानौ चतुरक्षौ शबलौ साधुना पथा॥ अथा पितॄ
न्सुविदत्रां उपेहि यमेनये सधमादं मदंति॥१॥ यौ ते श्वानौ यमरक्षितारौ चतु
रक्षौ पथिरक्षी नृचक्षसौ॥ ताभ्यामनं ऋपरिदेहि राजन्स्वस्ति चास्मा अनमीवं च
धेहि॥२॥ मैनमग्ने विदहो माभिशोचो मास्यत्वचं चिक्षिपो मा शरीरं॥ यदा
शृतं कृणवो जातवेदोथेमेनं प्रहिणुतात्पितृभ्यः॥१॥ शृतं यदा करसि जा
थे२ तवेदोथेमेनं परिदत्तात्पितृभ्यः यदा गच्छात्यसुनीतिमेतामथा देवानां वश प्रमो
नीर्भवाति॥२॥ सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा॥ आ २१
पो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः॥३॥ अजो भागस्त

पसा तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः॥ यास्ते शिवास्तन्वो जातवेदस्ताभि
र्वहेमं नं सुकृतामु लोकं॥४॥ अवसृज पुनरग्ने पितृभ्यो यस्त आहुतश्चार
ति स्वधाभिः। आयुर्वसान उप वेतु शेषः संगच्छतां तन्वा जातवेदः॥५॥ यत्ते
कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः॥ अग्निष्टद्विश्वादगदं
कृणोतु सोमश्च यो ब्राह्मणां आविवेश॥६॥ पूषा त्वेति च तसृणां देवश्र
वाः पूषा त्रिष्टुप्॥ दह्यमानः पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवन
स्य गोपाः॥ स त्वैतेभ्यः परिददत्पितृभ्योग्निर्देवेभ्यः सुविदत्रियेभ्यः॥१॥
आयुर्विश्वायुः परिपासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात्॥ यत्रासते सु
कृतो यत्र ते ययुः स्तत्र त्वा देवः सविता दधातु॥२॥ पूषेमा आशा अनु वेद

अंसे०
२२
सर्वाः सोअस्मांअभयतमेननेषत्॥ स्वस्तिदाआघृणिः सर्ववीरोप्रयुछन्पुर
एतुप्रजानन्॥३॥ प्रपथेपथामजनिष्टपूषाप्रपथेदिवः प्रपथेपृथिव्याः॥ उ
सधस्थे२ भेअभिप्रियतमेआचपराचचरतिप्रजानन्॥४॥ उपसर्पेतिचतसृणांसं
कुसुकऋषिः। पितरोदेवता॥ आद्या त्रिष्टुप्॥ द्वितीयाप्रस्तारपंक्तिः॥ तृती
यात्रिष्टुप्॥ चतुर्थीजगती॥ दृष्ट्यमान० उपसर्पमातरंभूमिमेतामुरुव्य
चसंपृथिवींसुशेवां॥ ऊर्णम्रदायुवतिर्दक्षिणावतएषात्वापातुनिर्ऋतेरु
पस्थात्॥१॥ उच्छ्वंचस्वपृथिवीमानिबाधिथाः सूपायनास्मैभवसूपवंचना॥ २२
सुतिष्ठतुसहस्रंमितउपहिश्रयंतां॥३॥ उच्छ्वंचमानापृथिवी॥ मातापुत्रं
यथासिचाभ्येनंभूमऊर्णुहि॥२॥ तेगृहासोघृतश्चुतोभवंतुविश्वाहा

स्मैशरणाः संत्वत्र॥३॥ उत्तेस्तभ्नामिपृथिवींत्वत्परीमंलोगंनिदधन्मोअहंरिषं॥ ए
तांस्थूणांपितरोधारयंतुतेत्रायमः सादनातेमिनोतु॥४॥ सोमएकेभ्यइतिपंचानांय
मीभाववृत्तोनुष्टुप्॥ दृष्ट्यमान० सोमएकेभ्यःपवतेघृतमेकउपासते॥ येभ्योमधुप्रधाव
तितांश्चिदेवापिगच्छतात्॥ तपसायेअनाधृष्यास्तपसायेस्वर्ययुः॥ तपोयेचक्रिरेम
हस्तांश्चिदे०॥२॥ येयुध्यंतेप्रधनेषुशूरासोयेतनूत्यजः॥ येवासहस्रदक्षिणास्तांश्चिदे०॥३॥
रु४ येचित्पूर्वऋतसापऋतावानऋतावृधः॥ पितॄंतपस्वतोयमतांश्चि०॥४॥ सहस्रणी
थाः कवयोयेगोपायंतिसूर्यं॥ ऋषींतपस्वतोयमतपोजांअपिगच्छतात्॥५॥ उ
रूणसावितियस्याअनोत्रिष्टुप्॥ दृष्ट्य० उरूणसावसुतृपाउदुंबलौयमस्यदूतौचर
तोजनांअनु॥ तावस्मभ्यंदृशयेसूर्यायपुनर्दातामसुमद्येहभद्रं॥ एतान्मंत्रान्

म २ ग २

अंत्ये० २३ जपन्दह्यमानं प्रेतोनोरिति त्रीञ्जपेत्॥ कपालमोक्षानंतरं मृन्मयोदकुंभं सव्येसेतौ
परिनिधाय स्थापयेत्॥ कपालमोक्षानंतरं गृहीत्वा॥ स्फटिनब्राह्मणानां दृष्टमागे
अश्मेनः छिद्रं कृत्वा॥ प्रेतपाददेशाद्दक्षिणं त्रिः परिव्रजंजपेत्॥ वातास्ते वां
तुपयिभिः पुण्यगंधा मनः सुखा गात्रसुखो नु लोमाः त्वचः सुखा मांससुखा अ
स्थिभोरख्यावहंतु त्वां मरुतः सुकृतां यत्रलोकाः इमा आपो मधुमत्यो स्मिंस्तिलोक
उपदुग्धंतामक्षीयमाणा स्वधानमः॥ इत्येकवारं परिक्रम्य पाददेशाएवस्थित्वाश्म
नाकलशे द्वितीयछिद्रं कृत्वा प्रजंजयेत्॥ इमा आपो मधुमती रंतरिक्षेलोक उपदु जपो० २३
ग्धंतामक्षीयमाणा स्वधानमः॥ पुनस्तथैव तृतीयछिद्रं कृत्वा प्रजन्जयेत्॥ इमा
आपो मधुमत्यः स्वर्गेतिलोके उपदुग्धंतामक्षीयमाणा स्वधानमः॥ परिक्रमणं
च सर्वेषां सगोत्राणां॥ एवं त्रिः प्रदक्षिणीकृत्य प्रेतशिरोदेशे अश्मा परिकुंभे॥

उदक्कुंभं स्फोटयित्वा स्वयं दक्षिणमुखः अश्मानं गृहीत्वा हस्तेनावेक्षमाणाः
सव्यमाहत्य कनिष्ठपूर्वा निगच्छेयुः स्त्रियापादरोकुंभं स्फोटयित्वा मंत्रं पठेत्॥ इ
मेजीवेति संकुसुकोमृत्स्व स्विष्टु १॥ जपेदिं इमे जीवा विमृतैरावदृत्रं न्नभूद्भद्रादेवह
तिर्नो अद्य॥ प्रांचो अगामनृतये हसाय द्राघीय आयुः प्रतरं दधानाः अयं मंत्रः क
र्तुरेव॥ जयं तम ते सर्वेषां॥ ततो यत्राहह्रदकं भवति तत्रगत्वैकवाससो दक्षिणामु
खा मुक्तकेशाः सर्वे सगोत्रिणो ह्यधपूर्वाः सपिंडाः मोदकास्थसकृन्निमज्याच
म्योत्तीर्य येनाश्मना कुंभच्छिद्राणि कृतानि तं तीरे निधाय तस्योपरि सतिलं तिलां
जलिं दक्षिणहस्त पितृतीर्थेन सव्योनरपाणिकादधः रपसव्येन अमुकगोत्र अ
मुकनामशर्मन्प्रेतेतत्तिलोदकमुपतिष्ठतामित्येकैकोंजलिं देयः सगोत्रा स्त्रियो

पिदध्कः॥ एकदा अयुग्मादकं घ्कः ब्रह्मचारिणा दद्यात्॥ मातृपितृगुर्वाचार्यमाता
महमातामहीभ्यः सोपि दद्यात्॥ शवचाह कैश्चदेयं॥ अन्येषु सुहृदो दध्कर्नवा॥ दाने
त२ पिनाश्म नियमः॥ पतितत्वादयो न दध्कः॥ क्षत्रियो दक्षुखाः वैश्याय प्राङ्मुखाः॥ स्र
ड्ब्राह्मणयोर्दक्षिणामुखादध्कः॥ ततः दाहजनिततृषोपशमनार्थं इदं ते वासोदक
मुपतिष्ठतामिति कर्त्ता अश्मनि उत्तरीयोदकं दद्यात्॥ ततः सर्वे अन्यानि वासांसि
परिधाय आर्द्राणि अधोदशानि सकृदेव निष्पीड्य॥ शोषणार्थं उदग्दशानि निक्षिप्य २८
आसीरन्॥ दिनदाहे आतारकोदद्यात्॥ रात्रिदाहे आसूर्योदयात्॥ शवस्पर्शि
नामप्येवं॥ कृतांतु आर्द्रवासः अद्येत्यादि उक्त्वा अपसव्यं कृत्वा अमुकगोत्रस्या २४
मुकशर्मणः प्रेतस्य प्रेतविमुक्तो तमलोकप्राप्त्यर्थं प्रथमदिन विधिं करिष्ये

इति संकल्प्य॥ ताम्रादिमये नवेनांउ पिंडार्थं हविः श्रपयित्वा॥ अमुकगोत्रस्यामु
कशर्मणः प्रेतस्य दाहजनितपीडोपशमनार्थं मृत्तिकास्नानं करिष्य इति संकल्प्य॥
उदुत्यमिति मृदं गृहीत्वा॥ ॐ उदुत्यं जातवेदसं देवं वहंति केतवः॥ दृशे विश्वाय सू
॥आ ह स्रे नेत्रि४ र्यं इति सूर्याय दर्शयित्वा॥ सहस्रशीर्षेति शिरो लिंपेत्॥ अंगादंगादिति स
र्वांगे॥ एवमाद्येहनि मृत्तिकास्नानं त्रिवारं॥ तत आचम्य॥ अमुकगोत्रस्यामुक
शर्मणः प्रेतस्य दाहजनिततापोपशमनार्थं तिलतोयांजलिं करिष्ये इति संकल्प्य॥
कुशेषु अश्मानं स्थापयित्वा तस्योपरि अमुकगोत्र अमुकशर्मन्प्रेत दाहजनि
ततृषोपशमनार्थं एष तिलतोयांजलिरुपतिष्ठतामिति दक्षिणामुखो दद्यात्॥
एवं दशाहांतमहरहमेकैकमंजलिं वर्धयेत्॥ एवं पंचाशादंजलयो भवंति॥

द्वयोन्नरद्वध्यावादद्यात्॥ प्रत्यहं दशादशावादद्यात्॥ एवं शतं नवंति॥ प्रत्यहं त्रयं त्र
यं वादद्यात्॥ एवं त्रिंशत्॥ प्रत्यहं मेकमेववा॥ एवं दशा नवंति॥ प्रत्यजलिस्त्वानंका
यं॥ ॥इमंलोकं परित्यज्य गतोसि परमांगतिं॥ मनसा वायुरूपेण कुशोत्वां योज
याम्यहं॥ ततोमुक गोत्रामुक शर्मन्प्रेत आद्येहनि विरोक्यवनिष्पत्त्यर्थं एष पिं
डस्तवोपतिष्ठतामिति कुशोपरि मद्यांनं पिंडं दक्षिणामुखः प्राचीनावीतिर्दद्यात्॥
तत अमुकेत्यादि पिंडस्योपरि एतत्तिलोदकमुपतिष्ठतामिति तिलोदकं दद्यात्॥
पितृतीर्थेन एतत्पिंडोपरि भृंगराजपत्रं तुलसीदलं चोपतिष्ठतामिति भृंगराजं तु
लसीदलं च दत्वा अनादिनिधनो देवः शंखचक्रगदाधरः॥ अक्षय्य पुंडरीकाक्षः २५
प्रेतमोक्षप्रदो भवेति पठेत्॥ इदं पिंडदानं सतिलोदकं प्रेताप्यायनमस्त्विति
ब्रूयात्॥ अभिरम्यतामिति ब्रूयात्॥ पिंडमुदके निक्षिप्य स्नात्वा चामेत्॥ अ

यनवश्राद्धं॥ प्रथमे द्वितीये च पंचमे सप्तमे तथा॥ नवमैकादशे चैव तं नव
श्राद्धमुच्यते॥ ॥इति वचनात्॥ नवश्राद्धे मंत्राभावः॥ आचम्य प्राणानायम्य
देशकालौ स्मृत्वा अमुकगोत्रस्यामुक शर्मणः प्रेतस्य प्रेतत्वविमुक्त्योत्तरोत्तम
लोकप्राप्त्यर्थं आद्येहनि नवश्राद्धं करिष्य इति संकल्प्य येत्॥ ततः अमुकगोत्र
अमुकशर्मन्प्रेतेति संबुध्यं तमयं ते क्षण उपतिष्ठतामिति क्षणं दत्वा तथैव पाद्यं
दत्वा अमुकगोत्रस्येत्यादि षष्ठ्यंतमुक्त्वा नवश्राद्धे इदमासनमुपतिष्ठतामित्या
सनं॥ ततो दक्षिणाग्रं कुशमेकं धृत्वा तत्रैवार्घ्यपात्रमासाद्य तत्रैकं पवित्रं क्षि
प्त्वामुकगोत्रेत्यादि संबुध्यांते प्रेते त्वं तमुक्त्वा नवश्राद्धे इदमर्घ्यं तवोपतिष्ठता
मित्यर्घ्यं दत्वा तद्देवप्रत्यक्षं दास्यमानेनवा आच्छादनं दद्यात्॥ ततो घृताक्तं

अंत्ये २६

तमार्दय अमुकगोत्रायामुकप्रेताय स्वधेत्येकामाहुतिं जुहुयात्॥ विप्रपाणौ इ
दमुग्नौकरणं केचिन्नेच्छंति॥ ततः सोपस्करमामं द्विजाये कुशबटोर्वाग्नेतिनि
धाय॥ ॐ विष्णो आमं रक्षस्वेति स्पृष्ट्वा तूष्णीं पात्रमालभ्यामुकगोत्रायेत्यादि प्रे
तायेत्यंतमुक्त्वा इदमामं दास्यमानं वा यथाशक्ति सोपस्करं सोदकुंभं सदक्षि
णमुपतिष्ठतामिति कुशोदकतिलान् दद्यात्॥ ततो नामगोत्रादि चतुर्थ्यंतमुक्त्वा
आद्येह निविषमस्त्राधे अयं सक्तुपिंड उपतिष्ठतामिति पिंडं दत्वा तिलोदकं भृं
गराजं च पूर्ववद्दत्वा॥ तूष्णीं विकिरं दत्वा॥ अनादिनिधनो देव इति श्लोकं पठित्वा अपो० २६
अभिरम्यतामिति उक्ते अभीरम्याति तास्मीति उक्तः पिंडं प्रावाहयित्वा यात्॥ ॥
ततः आचम्य प्राणानायम्य देशकालौ स्मरणादि कृत्वा अमुकेत्याद्युक्त्वा

आमान्नी ४

प्रेतत्वनिवृत्तिकामः अद्य मद्दिनविहितं नग्नप्रच्छादनश्राद्धं करिष्ये इति संकल्प्य॥ पा
द्यार्घ्याच्छादनानि पूर्ववद्दत्वा अग्नौ प्रेताय स्वाहेति एकाहुतिरूपमग्नौकरणं कृ
त्वा न वा॥ अमुकेत्यादि चतुर्थ्यंतमुक्त्वा प्रेतत्वनिवृत्तये नग्नप्रच्छादनश्राद्धे इदं
दास्यमानं वा यथाशक्ति सोपस्कारं सघृतं मोदकुंभं सवस्त्रं सकांस्यं यथाश
क्ति सुवर्णरजतलोहं तैलं दक्षिणोपेतं सोपानत्कं सोदपात्रं उपतिष्ठतामिति॥
पूर्ववद्दर्भशिखोपरि नग्नप्रच्छादनश्राद्धे पिंड उपतिष्ठतां तिलोदकं भृंगराजं
अनादिनिधनादि स्नानांतं पूर्ववत्॥ ततः अमुकेत्यादि प्रेतस्येत्यंतमुक्त्वामु
ष्माल्लोकात् अन्यलोकगमनार्थं पाथेयश्राद्धं करिष्ये इति संकल्प्य॥ पाद्यासना
र्घ्याच्छादनाग्नौकरणामान्नपिंड तिलोदक भृंगराज श्लोकपठनादि स्नानांतं पूर्ववत्

अंत्ये०
२७

सर्वत्रामश्राद्धेत्राक्याद्दशगुणमष्टगुणं पंचगुणं चतुर्गुणं द्विगुणं वा दद्यात्॥
अस्थिसंचयनानंतरं पाथेयश्राद्धमिति स्मृत्यर्थसारे उक्तं॥ ततः सर्वे शुक्लव
स्त्राणि धारयेत्॥ कर्ता तु त्रिगुणमधोदशावासः॥ आर्द्रवस्त्रं निष्पीड्योदग्द
शं शोषणाय क्षिपेत्॥ ततः शुक्लं परिदध्यात्॥ ततो दृष्टे पुनक्षत्रे पुत्र उदिते वा
ग्र५ सूर्ये सर्वे बालपुरःसरा वृद्धजघन्या गृहं द्वाराधारदेशे निंबपत्राणि विदश्य पुन
स्याचम्य पाषाणाग्निगोमयाक्षततिलोदकदूर्वावृषभसर्षपान्यथाक्रमेण स्पृष्ट्वा
देहल्यग्रमतिचरणं दत्वा विशेयुः॥ शववाहकानामपि निंबपत्रदर्शनादि एका २७
हं चाशौचं तद्गृहे वासे त्र्यहं॥ तदन्नभुक्तौ तद्गृहवासे च दशाहं॥ ततः पश्चादिल
बितयोः शिक्ययोर्नवैर्मृद्भाजनद्वये जलं दुग्धं च निक्षिप्य॥ प्रेतात्र स्नाही इ

दं च पिबेदिति वदेत्॥ निंबपत्रभक्षणं भाजनस्थापनं च कृताकृतमिति स्मृत्य
र्थसारे॥ तस्मिन्न् दिने गेहे पाको न विधेयः क्रीतलब्धं वा गृह्णीयुः॥
गोत्रजानां तद्दिने तद्गृह एव भोजनं॥ आमिषलवणपयोमिष्टान्नपरूपपायसा
दिना दध्यः कर्ता भोजनकाले पात्रस्थं किंचिद्घृतमन्नमादाय अमुकसगो
प्रेतायेत्यंतमुक्त्वा इदमन्नमुपतिष्ठतु इति गृहे परिक्षिपेत्॥ भोजनपात्रसमीपे
वा दद्यात्॥ एवं दशाहं दद्यात्॥ दशदिनानि भोजनस्नानविपर्ययो न कार्यः॥
हविष्यान्नमेव भुंजीयात्॥ खेलनहास्यहर्षाभ्यास्यमनोज्ञ वस्त्रादिधारण
तैलाभ्यंगस्त्रीसंगखट्वाशयनान्यस्पर्शादीनि वर्जयेयुः॥ रात्रौ पृथग्गेषरण्या
स्थले भूमौ शयीरन्॥ महागुरुनिपाते त्र्यहमेकाहं चोपवासः॥ पारणार्थ

अंत्ये० २८

क्रितेन लब्धेन वान्नेन ॥ पत्न्याश्चैवं ॥ बालवृद्धातरुणांनैते नियमाः ॥ अथास्थिसंचय
नं तत्र द्वय मे द्वितीये वै तृतीये च तुर्थे सप्तमे नवमे वा दिने कार्यं ॥ कृष्णपक्षे दशम्या
ऊर्ध्वमयुक्तितीथिषु एकादश्यां त्रयोदश्यां पंचदश्यां वा कृष्णपक्षाभावे सपिंडि
करणात्पूर्वं मृत्युकेकाले ॥ फाल्गुनीद्वयाषाढद्वयप्रोष्ठपद्याद्वये त्रिजन्मपुष्य
हस्तनक्षत्रेषु न ॥ अंगारकार्मकंवारेषु न ॥ नंदातिथौ न ॥ अस्थ्यां च तु करस्थ
शादिस्पर्शे पंचगव्येन सालग्रामतुलस्युदकेन च प्रोक्ष्य कुर्यात् ॥ दाहदेश गत्वा
चम्यदेशकालौ संकीर्त्य अमुकगोत्रस्येत्यादि अमुकप्रेतस्य प्रेतत्वनिवृत्त्य प्रयो० २८
र्थं अस्थिसंचयनं करिष्ये इति संकल्प्य ॥ शमीशाखया सक्षीरोदकेनापस
व्यं परिक्रामन् त्रिः श्मशानदेशीशीतिकेति प्रोक्षयेत् ॥ शीतिकोदमनोग्नि
त्रिष्टुप् ॥ अस्थिप्रोक्षणे वि० ॥ ॐ शीतिके शीतिकावति ह्लादिके ह्लादिकावति ॥

मंडूक्या ॥ सुसंगमय मंत्र १ ग्निं हर्षय ॥ अनेन पादादारभ्य सर्वाचितिं प्रोक्षयेत् ॥
ततो वृद्धा विषमाः कर्हसदिताः अंगुष्ठोपकनिष्ठिकाभ्यां गृहीत्वा ॥ एकैकमस्थि पा
दः प्रभृति शिरः पर्यंतं यथाशब्दो न भवति ॥ तथा नवे अमंगले कुंभे निदध्युः ॥ स्त्रि
याः कुंभ्यां ॥ स्तनरहितः कुंभः स्तनवान् कुंभी अन्यच्च स्मश्रूर्पेण संशोध्य सूक्ष्मा
स्थीन्यपि कुंभे निधाय गंधगायां क्षिपेत् ॥ ततो यत्र वर्षाकालोदकैरन्यकाले
जलं नागच्छति तादृशो शुद्धे प्रदेशस्ते देशे गर्तं कृत्वा ॥ उपसर्पेति संकुसुकः पृथिवी
मृत्युः पितरो वा त्रिष्टुप् ॥ अस्थिकुंभस्य गर्तप्रक्षेपे वि० ॐ उपसर्पमातरं भूमिं
एतामुरुव्यचसं पृथिवीं सुशेवां ऊर्णम्रदा युवतिर्दक्षिणावत एषात्वापातु नि
र्ऋते रुपस्थात् ॥ अनेन मंत्रेण कर्ता घटं निदध्यात् ॥ उच्छ्वंचस्वेति संकुसुको मृ

अंत्ये० २९ त्फः पितरः पृथिवीवा प्रस्तारपंक्तिः पांसुक्षेपणे वि० उच्छ्वंचस्व पृथिवि मा नि बाधि
थाः॥ सूपायनास्मै भव सूपवंचना॥ माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि॥ अ
नेन घटस्य समंतात्खनने मृदं क्षिपेत्॥ उच्छ्वंचमानेति संकुसुकः पृथिवी मृत्युः पि
तरो वाजगती॥ अस्थिसमीपे जपे वि० उच्छ्वंचमाना पृथिवी सुतिष्ठतु सहस्रं मित
उप हि श्रयंतां ते सौ गृहासो घृतश्चुतो भवंतु विश्वाहास्मै शरणाः संत्वत्र॥ इति मंत्रमं
जलिं बध्वा जपेत्॥ ततः उत्ते स्तभ्नामीति संकुसुकः पृथिवी पितरो ऽनुष्टुब्वा त्रिष्टु
प्॥ कपालेन घटस्यापिधाने वि० ॐ उत्ते स्तभ्नामि पृथिवीं त्वत्परीमं लोगं निद प्रयो०
धन्मो अहं रिषं॥ एतां स्थूणां पितरो धारयंतु तेत्रा यमः सादना ते मिनोतु॥ अने २९
न नवखर्परेण घटं पिदध्यात्॥ ततो यथा कुंभो न दृश्यते तथा मृदं निधाय॥ पश्चा

२८

द्नवेक्षमाणोन्यत्र गत्वा स्नायात्॥ ततो गोमयेन श्मशानदेशमुपलिप्य तत्र
त्रिकोणां वेदिं कृत्वा॥ हरिशोनालं कृत्वा॥ तत्रोदकपूर्णकुंभं तस्योपरि महां
तं तक्रपिंडं च स्थापयित्वा॥ अद्येत्यादि अमुगोत्राया अमुकप्रेताया भोजनार्थ
मयं पिंडः॥ पादानार्थं चोदकुंभोदकमुपतिष्ठतामिति कुशतिलजलं क्षिपे ३४
त्॥ ततः तत्पश्चिमे नागे श्मशानवासिने रुद्राय अयं पिंड उपतिष्ठतामिति रु
द्राय पिंडांतरं दद्यात्॥ श्मशानवासिभ्यः प्रेतेभ्यो यं पिंड उपतिष्ठतामिति॥
उत्तरतः पिंडांतरं॥ प्रेतसखेयं पिंड उपतिष्ठतामिति उत्तरतः पिंडांतरं॥ प्रे
तसखेयं पिंड उपतिष्ठतामिति पूर्वतो दक्षिणतो वा प्रेतसखेयं पिंडांतरं॥
ततः क्रमेण तेषामुपरि तिलोदकं अमुकस्मै तिलोदकमुपतिष्ठतामिति दद्यात्

ततःपोलिकात्रयंपादुकाषट्कंछत्रत्रयंचकाल्लायदहनपतये॥यमायदह
नपतयेमृत्यवेदहनपतये॥इदंमुपतिष्ठतामितितूष्णींकंक्रमेणदद्यात्॥ततो
यमस्थाम्नामुपतिष्ठतामितिपोलिकादद्वास्नायात्॥ततोमुकप्रेतस्यविमो
क्षार्थंअस्थिसंचयनश्राद्धंकरिष्येइतिसंकल्प्यमंडलंकृत्वातत्रदक्षिणाग्र
दर्भशिखायांक्षणपाद्यासनार्घ्यगंधगराजाच्छादनादिअमुकप्रेतायेदमुप
तिष्ठतामितिदद्यात्॥तूष्णीमभ्यर्च्यतंअग्नौकरणंप्रेतायेदमुपतिष्ठतामि
तिततोसूकेत्यादिप्रेतानंतंचतुर्थ्यंतमुक्त्वा॥इदंदास्यमानंवामंसोदकंनंस
दक्षिणामुपतिष्ठतामिति॥ततोदर्भशिखायाममुकप्रेतायास्थिसंचयनश्रा
द्धे अयंपिंडउपतिष्ठतामितिपिंडंदत्वातथैवतिलोदकंगंधगराजंच॥अना

दिनिधनइत्युक्त्वापिंडप्रवाहणंकृत्वास्नायात्॥अस्थिसंचयनानंतरंसपिंडानांरा
*सम्पासनादौनदोषः॥अधिकारिवर्ज्यमितिनिर्णयसिंधौ॥ ॥अथद्वितीयदिनकृ
त्यं॥पूर्वदिनकृतदेशंगत्वामुकगोत्रस्यसादिप्रेतस्येत्यंतमुक्त्वाप्रेतत्वनिवृत्तो
त्तमलोकप्राप्तयेद्वितीयदिनविधिंकरिष्येइतिसंकल्प्य॥पूर्ववन्मृत्तिकास्नानंकृ
त्वापूर्ववत्संकल्प्याश्मोपरितिलतोयांजलित्रयंधूपंदीपंशरावादद्यात्॥हविश्रपयि
त्वा॥अद्येत्याद्युक्त्वामुकप्रेतस्यचक्षुश्रोत्रनासावयवनिष्पत्त्यर्थंअयंपिंडउप
तिष्ठतामितिदर्भशिखोपरिपिंडंदत्वातिलोदकंगंधगराजंतुलसीदलनदानंपूर्ववत्
अनादिनिधनइत्युक्त्वापिंडप्रवाहयेत्॥स्नायात्॥एवंसर्वदिनेषु॥ ॥अथतृती
यदिनकृत्यं॥ ॥पूर्ववत्तृतीयदिनविधिंकरिष्येइतिसंकल्प्याश्मोपरितिलांज

अंत्ये॰ ३१ लयः पंचत्रयः दशावा॥ स्नात्वामुकप्रेतस्य भुजवक्षोग्रीवामुखावयवनिष्पत्यर्थं
अयं पिंड॰॥ तिलोदकादि पूर्ववत्॥ पिंडं प्रवाहयेत्॥ अद्येत्यादि॥ तृतीयदिने वि
षमश्राद्धं करिष्ये इति संकल्प्य॥ क्षणादि पिंडप्रवाहणं स्नानांतं विषमश्राद्धमाद्य सर्व
दिनवत्कुर्यात्॥ ॥अथ चतुर्थदिनकृत्यं॥ ॥संकल्प्यादि पूर्ववत्॥ अंजलयः॥
सप्तत्रयं चत्वारदशावा दद्यात्॥ स्नानं कृत्वा पूर्ववदद्येत्यादि उक्त्वामुकप्रेतस्य पा
र्श्वकुक्षिकटीनाभिगुदलिंगावयवनिष्पत्यर्थमयं पिंडदानं तीलोदकादि पिंड
प्रवाहणस्नानांतं पूर्ववत्॥ ॥अथ पंचमदिनकृत्यं॥ ॥संकल्प्यादि अंजलयो प्रयो ३१
नवत्रयः॥ पंचदशावा॥ स्नानं॥ अद्येत्यादि अमुकप्रेतस्य ऊरुजानुजंघाद्यवय
वनिष्पत्यर्थं॥ पिंडदानं तिलोदकादि पिंडप्रवाहणादि प्राग्वत्॥ स्नानं च॥ वि

षमश्राद्धं प्राग्वत्॥ ॥अथ षष्ठमदिनकृत्यं॥॥ संकल्प्यादि अंजलय एकाद
शत्रयः षट्दशावा स्नानं॥ अद्येत्या॰ अमुकगोत्रस्यामुकप्रेतस्योत्तमलोक॰ गु
ल्फपादांगुलिमर्माद्यवयवनिष्पत्यर्थं अयं पि॰ पूर्ववत्॥ ॥अथ सप्तमदिनकृ
त्यं संकल्प्यादि पूर्व अंजलयः॥ त्रयोदशत्रयः सप्तदशावा स्नानं॥ अद्येत्यादि अमुक
प्रेतस्यास्थिमज्जाशिरावायवनिष्पत्यर्थं अयं पिंड॰ प्राग्वत् सर्वं विषमश्राद्धे सर्वं स्ना
नादि प्राग्वत्॥ अथाष्टमदिनकृत्यं॥ संकल्प्यादि अंजलयः पंचदशत्रयोऽष्टादशावा स्ना ददा ४
नं अद्येत्यादि॰॥ नखलोमाद्यवयवनिष्पत्यर्थं॰ पिंडदानं तिलोदकादि पिंडप्रवाह
णांतं स्नानं॥ ॥अथ नवमदिनकृत्यं॥ ॥संकल्प्याद्यंजलयः सप्तदशत्रयो नवदश
वा स्नानं॥ अद्येत्यादि॰॥ मर्मवीर्यादि सर्वावयवनिष्पत्यर्थं अयं॰ पिंडदानं तिलो

पा२

अंत्ये० ३२ दकादिपिंडप्रदानांतंस्नानं॥ अद्येत्यादि विषमश्राद्धं सर्वं प्राग्वत्॥ ॥अथ दशम
दिनकृत्यं॥ अद्येत्यादि विषमश्राद्धं। पूर्वदिनस्थले गत्वा संकल्पादि तिलांजलयः॥
एकोनविंशतिस्त्रयोदश वा स्नानं वा कृत्वा बहुश्रपयित्वा॥ अद्येत्यादि संकल्प्यामुक
प्रेतस्य क्षुत्पिपासा निवृत्त्यर्थं अयं० पिंडदानं तिलोदकं च गराजादि पिंडप्रदान
यांतं प्राग्वत्॥ ततो मृदा त्रिकोणां वेदिं कृत्वा गोमयेन मृज्य हरिद्रादिनालंकृत्य
तत्र कुंभपंचकं जलपूरणं स्थापयेत्॥ तदुपरि दिनपिंडान्यामुकगोत्रायामुक
शर्मणे प्रेताय क्षुत्पिपासा निवृत्त्यर्थं अयं पिंडः सोदकुंभ उपतिष्ठतामिति मध्य
स्थे॥ वायसेभ्य इति पश्चिमस्थे॥ प्रेताधिपतये रुद्रायेति उत्तरस्थे॥ केचित्तु ष्ट प्रेया ३२
यमे वाकृः॥ अत्र दक्षिणे प्रेताय श्मशानवासिने रुद्रायेति पूर्वे। श्मशानवासि
निचेरुद्रायेत॥ प्रेतसखिभ्य इति पूर्वस्थे॥ वैवस्वताय यमायेति दक्षिणस्थे॥ २

भ्यः प्रेतेभ्य उत्तरतः॥ प्रेतसखिभ्यः पश्चिमतः अन्ये त्रयमाहुः। तत्र मध्ये प्रेताय उ
त्तरतः प्रेतसखिभ्यः दक्षिणतो यमाय केचित्प्रेतस्थानमध्ये सजलकुंभः पिंडः॥
अन्यत्र भूमावेव पिंडमात्रमाहुः। पिंडोपरि तिलोदकं दत्वा॥ पादुकाछत्रपताका
पोलिकादि प्रत्येकं तेभ्यस्तेभ्य उपतिष्ठतामिति दद्यात्॥ ततः पश्चिमदेशस्थं पिंडं या
व५ वद्वायसो न भक्षयति तावत्तिष्ठेत्॥ ततो श्मशानं तैलेनाभ्यज्य जले क्षिपेत्॥ केचित्ते
न तैल निवृत्त्योत्तमलोकप्राप्त्यर्थं पूर्वोक्तानि दशदानान्यप्यत्र कुर्वंति शाकोमत्यां॥
ततः कर्ता प्रार्थिताः सर्वे बांधवाः संबंधिनश्च त्रीन्स्त्रीन्धर्मोदकांजलिनेकैकं वा प्रे
तोद्देशेन जलतीरे दद्युः॥ ततः पुत्रादीनां यथाचारं केशश्मश्रु वपनं नखच्छेदनादि॥
ततः सर्वे गोत्राय यथादेशाचारं निमालमज्जकादि स्नाता शुक्लशुक्लवाससो गृहं गत्वा

ला१

अंत्ये० सर्वं तत्रनुज्ञी रंनिति॥ ॥इति दशाहकृत्यं॥ ॥अथैकादशे ऽहनि कर्तव्यं॥ तत्र प्रातःस्ना
३३ यस्पृष्टानां मृत्पिंडानां सागः॥ मृतस्य परिधानवस्त्राद्यलंकारदेवार्चनस्वकीयमात्रा
र्यायनिवेदयेदन्यथा अशुचित निवृत्तिर्नस्यात्॥ गृहानुलेपनं॥ सर्वेषां पिंडानां मन्वे स२
स्नानं स्पृष्टसर्ववस्त्र प्रक्षालनं॥ पूर्वोक्तमार्गेण पंचगव्यं संपाद्य तस्य प्राशनं॥ ततः
कर्ता वृषोत्सर्गं कुर्यात्॥ एकादशेऽह्नि प्रेतस्य यस्य नोत्सृज्यते वृषः॥ प्रेतत्वं सुस्थिरं
तस्य दत्तैः श्राद्धशतैरपि॥ अत्र नाचार्यवरणं॥ काम्यवृषोत्सर्गवत्॥ किंतु स्वयमेव
सर्वं कुर्यात्॥ देशकालौ स्मृत्वा अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तये नमलो प्रयो।
कप्राप्तिर्थं वृषोत्सर्गं करिष्ये इति संकल्प्य॥ तदंगमग्निप्रतिष्ठापनादि चेति संकल्प्या ३३
ग्निं प्रतिष्ठाप्यान्वाधानं कुर्यात्॥ तस्मिन्नन्वाहिते त्यादि आज्यभागांतमुक्त्वा त्र प्र

ति २

सोमो धेनुं गौ तम: सोम त्रि छु १
सौम्य पायस ते मे वि०

धानं॥ रुद्रं च रुद्रेण सोमं पायसेन इंद्रं पावकेन शेषेण स्विष्टकृतमित्यादि परिस
मुनादि पूर्णपात्रनिधानांतं कृत्वा विधाय निर्वापादि कर्मेण हविस्त्रयं संपाद्य जु
कृ२ हुयात्॥ करुद्रायेघोरः कण्वो रुद्रो गायत्री॥ रौद्रचरुहोमे वि० ॐ करुद्रा
य प्रचेतसे मीढुष्टमाय तव्यसे॥ वोचेम शंतमं हृदे स्वाहा॥ रुद्रायेदं॥ सोमो धे
नुं सोमो अर्वंतमाशुं सोमो वीरं कर्मण्यं ददाति॥ सादन्यं विदथ्यं सभेयं पितृश्र
वणं यो ददाशदस्मै स्वाहा॥ सोमाये॥ इंद्रो वो मधुछंदा इंद्रो गायत्री॥ इंद्रपा
वकहोमे वि० ॐ इंद्रं वो विश्वतस्परि हवामहे जनेभ्यः अस्माकमस्तु केवलः
स्वाहा॥ इंद्रायेदं॥ स्विष्टकृदादिमार्जनांतं कुर्यात्॥ केचित्तु इंद्राय स्वाहेत्यादिना
हो१ मंत्रैरेवं समाहुः॥ ततो द्विहायनं एकहायनं वा जीववत्सायाः पयस्विन्याः॥

अंत्ये० ३४ पुत्रंनीलादिवर्णंलोहितोयस्तुवर्णेनमुखेपुच्छेचपांडुरः॥श्वेतःखुरविषाणाभ्यांसनी
लोवृषउच्यते॥यथालिखितंयथालाभेनवाआनीयचतस्रोधेएकांवाएकवर्षा
धिकांवत्सतरीमानीयगोसहितवृषस्यमंत्रैरभिषेकःकार्यः॥आपोहिष्ठेतिति
सृणांसिंधुद्वीपआपोगायत्रीवृषवत्सतर्यभिषेकेवि० ॐआपोहिष्ठामयोभुवः
ऋक्॥३॥कयानइतितिसृणांगौतमोवामदेवइंद्रोगायत्री॥अभिपुणइतिपा
आ४ दनिचृत्वृषवत्सतर्प०॥ॐकयानश्चित्रआभुवदूतीसदावृधःसखा।कयाशचिष्ठ
यावृता॥कस्त्वासत्योमदानांमंहिष्ठोमत्सदंधसः॥दृढाचिदारुजेवसु॥अ
भीषुणःसखीनामविताजरितृणां॥शतंभवास्यूतिभिः॥वृषवत्सतरीकंगं प्रयो० ३४
धाक्षतमाल्यादिभिःयथाशक्त्यालंकृत्य॥ऋषभंमितितिसृकस्यऋषभऋ

दू४

षभोनुष्टुप्॥अंत्यमहापंक्तिःऋषभापस्थानेवि०ऋषभंमितितिसृकंपंचर्चेकृतां
जलिपुटोभवेत्॥ॐऋषभंमासमानानांसपत्नानांविषासहिं॥हंतारंशत्रू
कू२ णांकृधिविराजंगोपतिंगवां॥अहमस्मिसपत्नहेंद्रइवारिष्टोअक्षतः॥अधः
सपत्नामेपदोरिमेसर्वेअभिष्ठिताः॥अत्रैववोपिनह्याम्युभेआर्त्नीइववृज्यया॥
वाचस्पतेनिषेधेमान्यथामदधरंवदान्॥अभिभूरहमागमंविश्वकर्मेणधा
म्ना॥आवश्चित्तमावोव्रतमावोहंसमितिंददे॥योगक्षेमंवआदायाहंभूया
समुत्तमआवोमूर्धानमक्रमी॥अधस्पदान्मउद्वदतमंडूकाइवोदकान्मं
डूकाउदकादिव॥ततोवृषंप्रदक्षिणमग्निंपूर्ववत्ततआनीयास्यदक्षिणवाकु
स्फीचिभस्मनात्रिशूलाकारंवामेचक्राकारंअंकयित्वातदुपरितप्तलोहेनांकये

अंत्ये० ३५ त॥ ततः शांवमुखस्तेन॥ व्रजंतमनुमंत्रयीत॥ ॥ ॐ एनं युवानं पतिं वो ददामि तेन
क्रीळंतीश्चरत प्रियेण॥ मा वः शाप्त जनुषा सुभगा रायस्पोषेण समिषा मदेम॥
इति शांताः पृथिवी शिवमंतरीक्षं द्यौर्नो देव्यभयं नो अस्तु॥ शिवा दिशः प्रदिश उद्दि
शो न आपो विद्युतः परिपांतु सर्वतः शांतिः शांतिः शांतिः सर्वतो व्रजस्येति सूयात्॥
ऋषभो पस्थानमेतदनंतरं वा॥ ततो हृष्य पूर्वाभिमुखं कृत्वा कद्रुद्रायेति त्र्यृचस्य
घोरः कण्वो रुद्रो गायत्री पूर्वादिगुपस्थाने वि०॥ ॐ कद्रुद्राय प्रचेतसे मीढुष्टमा
यतव्यसे॥ वोचेम शंतमं हृदे॥ यथा नो अदितिः॥ करत्पश्वे नृभ्यो यथा गवे॥ प्रयो० ३५
यथा तोकाय रुद्रियं॥ यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति॥ यथा विश्वे
सजोषसः॥ गाथपतिं मेधपतिं रुद्रं जलाषभेषजं॥ तच्छंयोः सुम्नमीमहे॥

यः शुक्र इव सूर्यो हिरण्यमिव रोचते॥ श्रेष्ठो देवानां वसुः॥ शं नः करत्यर्वते सु
गं मेषाय मेष्ये॥ नृभ्यो नारिभ्यो गवे॥ अस्मे सोम श्रियमधि नि धेहि शतस्य नृ
णां॥ महि श्रवस्तुविनृम्णं॥ मा नः सोम परिबाधो मारातयो जुहुरंत॥ आ न
इंदो वाजे नत॥ यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य॥ मूर्धा नाभा सोम वे
न आभूषंतीः सोम वेदः॥ रानस्तस्य जपांते गोभिः सहजलं पिबेत् तेनास्य यथा
सुखं क्रीडत्येतिविदेत॥ ततो दक्षिणामुखं कृत्वा॥ इमा रुद्रायेति सूक्तस्य कुत्स
रुद्रो जगती अंत्ये त्रिष्टुभो दक्षिणादिगुपस्थाने वि०॥ इमा रुद्राय तवसे कपर्दि
ने क्षयद्वीराय प्रभरामहे मतीः॥ यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे
अस्मिन्ननातुरं॥ मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते॥

२ आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥२.
रा २

अंत्ये० ३६ यच्छंचयोश्चमनुरायेजेपितातदश्यामतवरुद्रप्रणीतिषु॥अश्यामतेसुमतिं
देवयज्ययाक्षयद्वीरस्यतवरुद्रमीढ्वः॥सुम्नायन्निद्विशोअस्माकमाचरारिष्टवी दि २
राजुहवामतेहविः॥त्वेषंवयंरुद्रंयज्ञसाधंवंकुंकविमवसेनिह्वयामहे॥दिवोवरा
हमरुषंकपर्दिनंत्वेषंरूपंनमसानिह्वयामहे॥हस्तेबिभ्रद्भेषजा
वार्याणिशर्मवर्मछर्दिरस्मभ्यंयंसत्॥इदंपित्रेमरुतामुच्यतेवचःस्वादोःस्वा
दीयोरुद्रायवर्द्धनं॥रास्वाचनोअमृतमर्तभोजनंत्मनेतोकायतनयायमृळ॥
मानोमहांतमुतमानोअर्भकंमानउक्षंतमुतमानउक्षितं॥मानोवधीःपित ध्येया ३६
रंमोतमातरंमानःप्रियास्तन्वोरुद्ररीरिषः॥मानस्तोकेतनयेमानआयौमा
नोगोषुमानोअश्वेषुरीरिषः॥वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदमि

त्त्वाहवामहे॥उपतेस्तोमान्पशुपाइवाकरंरास्वापितर्मरुतांसुम्नमस्मे॥
भद्राहितेसुमतिर्मृळयत्तमाथावयमवइत्तेवृणीमहे॥आरेतेगोघ्नमुतपूरुष
म्हा २ घ्नंक्षयद्वीरसुम्नमस्मेतेअस्तु॥मृळाचनोअधिचब्रूहिदेवाधाचनःशर्मयच्छद्वि
बर्हाः॥अवोचामनमोअस्माअवस्यवःशृणोतुनोहवंरुद्रोमरुत्वान्॥तं
नोमित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीउतद्यौः॥ ॥सूक्तजपांतेगो
भिरिल्यादिपूर्ववत्॥ततःपश्चिमाभिमुखंकृत्वा॥आतेपितरितित्यादिसूक्त
स्यगृत्समदोरुद्रस्त्रिष्टुप्॥पश्चिमादिगुपस्थानं॥ ॐ आतेपितर्मरुतांसुम्नमे
तुमानःसूर्यस्यसंदृशोयुयोथाः॥अभिनोवीरोअर्वतिक्षमेतप्रजायेम
हिरुद्रप्रजाभिः॥त्वादत्तेभीरुद्रशंतमेभिःशतंहिमाअशीयभेषजेभिः॥

अं.ले.० व्य१स्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः॥ श्रेष्ठो जातस्य रुद्र श्रियासि
३७ तवस्तमस्तवसां वज्रबाहो। पर्षि णः पारमंहसः स्वस्ति विश्वा अभीती रपसो यु
योधि॥ मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती। उन्नो वीरां
(२४ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि॥ हवीमभिर्हवते यो हविर्भिरव
दू स्तोमेभी रुद्रं दिषीय॥ ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन्मना
यै॥ उन्मा ममन्द वृषभो मरुत्वान्त्वक्षीयसा वयसा नाधमानं॥ घृणीव च्छायामर
पा अशीयाविवासेयं रुद्रस्य सुम्नं॥ क्व१ स्य ते रुद्र मृळयाकुर्हस्तो यो अ प्रयो
स्ति भेषजो जलाषः। अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः॥ प्र ब ३७
भ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि। नमस्या कल्मलीकिनं न

मोभिर्गृणीमसि त्वेषं रुद्रस्य नाम॥ स्थिरेभिरंगैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः
पिपिशे हिरण्यैः। ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यं॥ अर्ह ६२
न्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपं। अर्हन्निदं दयसे विश्वम
भ्वं न वा ओजीयो रुद्र त्वदस्ति॥ स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममु
पहत्नुमुग्रं। मृळा जरित्रे रुद्र स्तवानो न्यं ते अस्मन्नि वपन्तु सेनाः॥ कुमारश्चि
त्पितरं वंदमानं प्रति नानाम रुद्रोपयंतं। भूरेर्दातारं सत्पतिं गृणीषे स्तु
तस्त्वं भेषजा रास्यस्मे॥ या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या
मयोभु। यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि॥ परि णो
हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्मही गात्। अव स्थिरा मघवद्भ्यस्त

अंत्ये० २८

नुषमीढुस्तोकाय तनयाय मृल॥ एवावभ्रोर्वृषभचेकितानयथादेवनहृणी
षेनहंसि॥ हवनश्रुतोरुद्रेहबोधि बृहद्वदेम विदथेसुवीराः॥ जपांते गोनिरि
त्यादिपूर्ववत्॥ ततः उदङ्मुखं कृत्वा॥ इमारुद्रायेति वसिष्ठोरुद्रोजगतीअं
त्यात्रिष्टुप् उत्तरादिगुपस्थाने वि०॥ ॐ इमारुद्राय स्थिरधन्वने गिरःक्षिप्रेष
वे देवाय स्वधाने॥ अषाल्हाय सहमानाय वेधसे तिग्मायुधाय भरतानृशृणो
तुनः॥ सहिक्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति॥ अवन्नवं
तीरूपनोदुरश्च रानमीवोरुद्र जासुनोभव॥ याते दिद्युदवसृष्टादिवस्परि वृषो ३८
क्ष्मया चरति परिसावृणक्तुनः॥ सहस्रंते स्वपिवात नेषजा मानस्तोकेषु
तनयेषुरीरिषः॥ मानोवधीरुद्रमापरादामातेभूमप्रसितौ हीलितस्य॥ आ

ये धर्मस्त्वं वृषरूपेण जगदानंदकारक। अष्टमूर्तेरधिष्ठानमतः पाहि सनातन। धर्मस्त्वं वृषरू
पेण ब्रह्मणा निर्मितः पुरा। तवोत्सर्गप्रभावेण मे तु मुंचन्तु किल्बिषात्

नोभजबर्हिषिजीवशंसे यूयंपात स्वस्तिभिः सदानः॥ जपांते गोनिरित्यादि
पूर्ववत्॥ ततः पुच्छे नामगोत्राद्यच्चार्य तर्पणं कुर्यादिति केचित्॥ एतावत्कृ
वृ० १ त्वा स्विष्टकृतादि कुर्यात्॥ ततो रुद्रः सोमेभ्यः आमान्नत्रयं सदक्षिणं
दद्यात्॥ ततो वृषोत्सर्गसंपूर्णतासिद्ध्यर्थं तिलानुदकुंभं गां वासो हिरण्यं
च यथाशक्तिदक्षिणां देया॥ पतिपुत्रवत्याः सुवासिन्या नवृषोत्सर्गः तत्
स्थाने एका पयस्विनी गौर्देया॥ ॥इति वृषोत्सर्गः विधिः समाप्तः॥ ॥वृषो
त्सर्गकरणाशक्तौ तत्प्रत्याम्नायश्च अन्यग्रंथोक्तानि लिख्यंते॥ निर्णय
सिंधौ॥ ॥वृषोत्सर्जनवेलायां वृषाभावे कथंचन॥ मृद्भिः पिष्टैश्च दर्भै
र्वा वृषं कृत्वा नियोजयेत्॥ १॥ हरिहरपद्धतौ॥ ॥वृषोत्सर्जनवेलायां

अंत्ये० ३९ वृषणावेकयंमवेत्॥हिरण्येनायदर्भैश्चकृत्वातुवृषमुत्सृजेत्॥अयमर्थः
समर्थोवावृषभावेकयंमवेत्॥गोष्ठात्तुवृषान्गृह्यं — त्वासुगान्तंनक्षयेत्स
स्तु॥नशक्यतेवृषान्स्तुहोमंचैवतुकारयेत्॥नकरोतियदाहोमंतदन्नंव्र
यशोणितं॥अतःकारणाद्दर्भप्रतिनिधिंकृत्वासर्वकर्माणिकारयेत्॥अ
न्यथादोषस्मरणादितिहरिहरपद्धतौ॥ ॥इतिवृषोत्सर्गप्रतिनिधिः॥ ॥
ततोद्यत्यादिपिंडप्रवाहणस्नानांतंनवश्राद्धैकोद्दिष्टंप्राक्तनविषमदिनव
त्कुर्यात्॥शिवस्वामिमतेनैतत्॥पंचैवनवश्राद्धानिद्वैर्वोक्तानितत्सते प्रयो ३९
॥ततोमहैकोद्दिष्टं॥ ॥तस्मिन्नेवाह्न्येकंब्राह्मणंनिमंत्र्यतस्यश्मश्रुकर्मा
भ्यंगादिकारयित्वा॥अद्येत्यादिअमुकगोत्रस्यअमुकप्रेतस्यमेप्रेतत्वनिवृ

त्त्योत्तमलोकप्राप्तयेएकादशाहेमहैकोद्दिष्टंकरिष्ये॥इतिसंकल्प्यक्षणपाद्या
सनार्घ्यगंधपुष्पाच्छादनादिदद्यात्॥तत्रार्घ्येदक्षिणाग्रकुशोपरिएकमर्घ्य
पात्रमासाद्य।तत्रैस्ते एकाकृतिंकृत्वा तदंनमग्नौक्षिपेत्॥नवापाणिहोमः॥
परिवेषणादिअंगुष्ठनिवेशनांतंकृत्वा॥अमुकगोत्रायामुकप्रेतायेदमन्नं
यथाशक्तिमोपस्करममृतरूपंउपतिष्ठतामितिसंकल्प्य॥आपोशनादि
दद्यात्॥दर्भशिखायांअमुकगोत्रेत्यादिअमुकप्रेतायेतिपिंडंप्रतिष्ठिता उ४
मितिपिंडंदद्यात्॥तिलोदकंतेगराजपत्रेतुजलीदजंदक्षिणांचदद्यात्॥
प्रेतस्यवस्त्रशयनाभरणानिपाउकाछत्रोदकपात्रवाहनादीनियथाश
क्तिदद्यात्॥वृषभीदक्षिणांचदत्वासंतोषयेत्॥अभिरम्यतामितिविसर्जनं

अंसे० ४० अग्निरम्यतास्मेति प्रतिवचनं॥ एकोद्दिष्टे एको विप्रः॥ द्विवैवनिमंत्रणं॥ एक
मर्घ्यपात्रं॥ धूपदीपो नस्तः स्वधाशाद्ध पितृशाद्ध नमः शाद्धानः संति॥ नाग्नि
श्रवणं सर्वशावीतावीति॥ नैव कार्यं॥ दैवं नास्ति॥ नाग्नौकरणं॥ एकपिंडः॥
अनुमंत्रणादि सर्वं अमंत्रकं॥ अक्षय्यस्थाने उपतिष्ठतामिति वदेत्॥ श्राद्ध
शेषे भोजनं कार्यं॥ अंते स्नानं। नवश्राद्धैकोद्दिष्टे तु सर्वममंत्रकं॥ स्मृत्यर्थसा
रे॥ महैकोद्दिष्टानंतरं नवश्राद्धमिति क्रमः॥ ॥इति महैकोद्दिष्टं॥ अथवि
श्रावे २ जानावैकोद्दिष्टविधिः॥ ॥ग्रामाद्बहिः शुचौ देशे गोमयेनोपलिप्ते व्याहृति प्रयो ४०
भिरग्निं प्रतिष्ठाप्य॥ परिसमुह्य परिस्तीर्य पर्युक्ष्य गंधादिभिरभ्यर्च्य द्विजव
दग्निसमीपे देशकालौ स्मृत्वा॥ आत्मनो वैकोद्दिष्टश्राद्धं करिष्ये इति संकल्प्य॥

क्षणादि पूर्ववत् कृत्वा॥ अग्निसमीपे पूर्ववदर्घ्यः अमुकगोत्रायेत्यादि प्रेतायस्वा
हेत्यन्तावेकाहुतिं होमः॥ परिवेषणादि संकल्पांतं पूर्ववत्॥ ततः उदीरते
त्यष्टभिर्मंत्रैः प्रणवाद्यैः स्वाहाकारांतैश्चतुर्वारमावृत्याद्वात्रिंशदाहुतीर्या
वमितः॥ सोपस्करस्यान्नस्य जुहुयात्॥ इदं न ममेति वर्जयेत्॥ उदीरतेत्य
ष्टर्चस्य शंखः पितरस्त्रिष्टुप्॥ महैकोद्दिष्टान्नहोमे विनियोगः॥ ॥ॐ उदीर
३ तामवर उत्परास उन्मध्यमाः पितरः सोम्यासः॥ असुं य ईयुरवृका ऋतज्ञास्ते
नोवंतु पितरो हवेषु स्वाहा॥ १ इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास
ईयुः॥ ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु स्वाहा॥ ॥२॥ आहं
पितॄन्सुविदत्रां अवित्सि नपातं च विक्रमणं च विष्णोः॥ बर्हिषदो ये स्वधया

त१

अंत्ये० ४१ सुतस्यमनजं पितरस्तरद्वागमिष्ठाः स्वाहा ॥३॥ बर्हिषदः पितरऊत्यर्वागिमावोह
व्याचकृमाजुषध्वं ॥ तआगतावसाशंतमेनाथानः शंयोररपोदधातस्वाहा ॥४॥
उपहूतापितरः सोम्यासोबर्हिष्येषुनिधिषुप्रियेषु ॥ तआगमंतुतइहश्रुवंत्वधि
वे४ ब्रुवंतुतेवंत्वस्मान्स्वाहा ॥५॥ आच्याजानुदक्षिणतोनिषद्येमंयज्ञमभिगृणीतविश्वे ॥
माहिंसिष्टपितरः केनचिन्नोयद्वआगः पुरुषताकरामस्वाहा ॥६॥ आसीनासोअरु
णीनामुपस्थेरयिंधत्तदाशुषेमर्त्याय ॥ पुत्रेभ्यः पितरः स्तस्यवस्वः प्रयच्छततइहो
र्जंदधातस्वाहा ॥७॥ येनपूर्वेपितरः सोम्यासोनूहिरेसोमपीथंवसिष्ठाः तेभिर्य प्रथा
मः संरराणोहवींष्युशन्नुशद्भिः प्रतिकाममत्तुस्वाहा ॥८॥ एवंद्वात्रिंशदाहु ४१
तीहुत्वोच्छिष्टपिंडेनदेयः ॥ अग्निसमीपेएकः पिंडः पूर्ववद्देयः ॥ विसर्जनांत

पूर्ववत् ॥ इत्यन्वावेक्ष्योद्दिष्टविधिः समाप्तः ॥ ॥अथरुद्रगणश्राद्धं ॥ तत्रैकाद
शरुद्रोद्देशेनरुद्ररूपप्रेतोद्देशेनप्रेतपात्रोद्देशेनवाकार्यं ॥ रुद्रोद्देशपक्षेसव्यं ॥
तद्रूपप्रेतोद्देशपक्षेप्रेतोद्देशपक्षेवाऽपसव्येन ॥ तत्रैकादशरुद्रनामानि ॥
वीरभद्रश्चशंभुश्चगिरीशश्चमहायशाः ॥ अजैकपादहिर्बुध्न्यः पिनाकीचा
पराजितः ॥ भुवनाधीश्वरश्चैवकपालीचविशांपते ॥ स्थाणुर्भगश्चभगवान्रुद्रा
एकादशास्मृताः ॥ ॥यथा॥ अजैकपादहिर्बुध्न्यः कपालीरुद्रएवच ॥ वृषाक
पीश्चशंभुश्चकपर्दीरैवतस्तथा ॥ हरश्चबहुरूपश्चत्र्यंबकश्चापराजितः ॥ अ
त्रप्रयोगः ॥ ॥देशकालौस्मृत्वा ॥ ॥गोत्रस्येत्यादिअमुकप्रेतस्यप्रेतत्ववि
मुक्त्योत्तमलोकप्राप्त्यर्थंरुद्रगणश्राद्धंकरिष्येतिसंकल्प्य ॥ क्षणपाद्यास

अंसे० नादिसर्वंक्रमेणकार्यं॥शक्तेनैकैकरुद्रनामग्रहणेकैकब्राह्मणभोजनंका
४२ र्यं॥एवंचैकादशब्राह्मणाभवंति॥अशक्तेसर्वोद्देशेनएकएवभोजनीयः॥
भोजनाभावेएकादशामान्नानि॥एकंवा॥रुद्ररूपप्रेतोद्देशपक्षेअनेकरुपा
द्रूपिणेमुकप्रेतायेदमासनमित्यादिप्रत्येकंकार्यं॥एकब्राह्मणपक्षेतुएका
दशनामान्युक्त्वाएतद्रूपिणेअमुकप्रेतायेत्याद्यकं॥भोजनानंतरंदक्षि
णाविसर्जनादिकार्यं॥अत्रपिंडदानार्घ्याग्नौकरणंविकिराणामभावः
॥अथवसुगणश्राद्धं॥ ॥इदंचकृताकृतं॥इदमप्यष्टवसूद्देशपक्षेअ प्रयो०
पसव्येनकार्यं॥शक्तेनाष्टौब्राह्मणभोजनीयाः॥अशक्तेसर्वोद्देशेनैकः॥ ४२
अन्नाभावेआमान्नं॥अन्यत्सर्वंपूर्ववत्॥अथवसुनामानि॥ध्रुवोध्वर

रश्चसोमश्चआपश्चैवानिलोनलः॥प्रत्यूषश्चप्रभासश्चवसवोष्टप्रकीर्तिताः॥
॥इति॥अत्रापिपिंडाद्यभावः॥इत्येकादशाहकृत्यं॥ ॥अथषोडशश्राद्धा
नि॥तानिच॥आद्यमासिक॥१॥ऊनमासिक२ द्वितीय३ त्रैपक्षिक४ तृती
यमासिक५ चतुर्थ०६ पंचम७ षष्ठ८ ऊनषष्ठ९ सप्तम०१० अष्टम११
नवम१२ दशम१३ एकादश१४ द्वादश०१५ ऊनाब्दिमासिक१६ तत्तत्का
लेकर्तव्यानि॥द्वादशाहेसपिंडीकरणाधिकारसिध्यर्थमपकृष्यैकाद
शेवाह्निकार्याणि॥एकोद्दिष्टविधिना॥यदिमरणादारभ्यद्वादशमास
मध्येकश्चिदधिकस्तदातन्मासिकंद्विवारंकार्यं॥एवंसप्तदशश्राद्धानि
भवंति॥ ॥अथप्रयोगः॥ ॥तस्मिन्नेवाह्निप्रातःषोडशब्राह्मणान्नि

अंत्ये ५५३ मंत्रतेषांश्मश्रुकर्मान्यंगीकारयित्वा॥ कृतमध्याह्निकः षोडशपाकांनिष्पाद्य
श्राद्धौ ओदनमात्रमेवं कृत्वाश्राद्धमुपक्रमेत्॥ अन्यशाको आमान्नैर्कुर्यात्॥ न २
देशकालौ स्मृत्वा॥ अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्यो जन्मलोक
प्राप्त्यर्थं आद्यमासिकमित्यादिकनाह्निकांतमुक्त्वा॥ एतानि षोडशश्राद्धा
नि स्वस्वकाले कर्त्तव्यानि॥ द्वादशाहे सपिंडिकारणाधिकारार्थं अपकृष्ये
कादशेवाह्नि अंनेनामांनेन वा एकोद्दिष्टविधिना तंत्रेण करिष्ये इति संक
ल्प्य अमुकप्रेतस्याद्यमासिके क्षणः क्रियतां एवं द्वितीयमासिकस्त्वा त्रयो ५३
दिषोडशश्राद्धानेषु क्षणं दत्वा॥ अमुकगोत्र अमुकप्रेत मासिके द्वितीय
मासिके स्त्यादि इदं ते पाद्यं उपतिष्ठतामिति एवं षोडशब्राह्मणेषु पाद्यं दद्या

त्॥ एवमासनार्घ्यगंधपुष्पाच्छादनानि प्रत्येकं षोडशभ्यो दद्यात्॥ अर्घ्येति
लावाप्यति॥ तिलोसि इति मंत्रेण महैकोद्दिष्टवर्हेडः॥ एकैकमर्घ्यं प्रत्येकं॥
षोडशपात्रेषु घृताक्तमन्नं प्रत्येकमादाय महैकोद्दिष्टवदमुकशर्मणे प्रे
ताय स्वाहेति एकैकमाहुतिं तत्तदन्नेन करे कृत्वा कृतमन्नमभ्यो प्रक्षिप्य
त५ स्वदाऊनिशिष्टमन्नं यथांशो गृहीतं तत्तदंनं तत्र तत्र परिविष्यांगुष्ठनिवेशनं
तं कृत्वामुकप्रेताद्यमासिकश्राद्धे इदमन्नं यथाशक्ति सोपस्करं समोदकं
ममभूतरूपमुपतिष्ठतामिति संकल्पयेत्॥ एवं द्वितीयमासिकादौ॥ भुक्त
वत्सु द्विजेषु तत्तदन्नं षोडशेषु पात्रेषु गृहीत्वा नत्र राऊनिशिष्टमन्नं तत्र त
त्र प्रक्षिप्य तत्तद्विप्रसमीपे दर्भशिखायाममुकगोत्रामुकप्रेताद्यमासि

अंत्ये० ४४ कादावयं तेपिंड उपतिष्ठतामिति षोडशापिंडान् दद्यात्॥ आमपक्षे आमान्नस्य संक
ल्पः॥ सक्तुपिष्टेन वा पिंडदानं॥ पिंडोपरि रिक्तं गराजपत्रादि महैकोद्दिष्टवत्॥ अं
जनानि सर्वं प्राकृतं॥ यथाशक्ति दक्षिणां दत्वा अभिरम्यतामिति विसर्जयेत्॥
अन्यत्सर्वं विहितप्रतिषिद्धादि महैकोद्दिष्टवत्॥ एवं एकदेशकालकर्तृकत्वात्तंत्रे
ण षोडशश्राद्धानि कुर्यात्॥ आद्यमासिकं सर्वं समाप्य द्वितीयादीनि प्रत्येकं पृ
थगेव सर्वाणि न तु तंत्रेणेति केचित्॥ एतदनंतरं आद्याब्दिकमप्येकोद्दिष्टविधि
ना कार्यं॥ आद्यमासिकेन तंत्रेण सिद्धेन पृथक्कार्यं॥ किंतु आद्यमासिकमाद्या प्रयो० ४४
ब्दिकं च तंत्रेण करिष्य इति संकल्पयेदिति केचित्॥ ॥अथ सपिंडीकरणश्राद्धं॥
तच्चानेककालत्वेपि कलौ द्वादशाहे एव कार्यं॥ अनित्यत्वाच्छरीरस्य॥ तत्र प्रयोगः॥

पूर्वेद्युः कर्विश्वेदेवार्थं द्वौ विप्रौ प्रेतस्य पित्रादेर्यैः सह सपिंडीकरणं तन्नार्थं त्री
नेकं च प्रेतार्थं एवं षड्ब्राह्मणान् निमंत्रयेत्॥ अत्यशक्तौ देवत्रयं प्रेते चैकैकमि
ति त्रीन्निमंत्रणादिन कर्तुमेषां च ब्रह्मचर्यं॥ अपरेद्युः ब्राह्मणानां श्मश्रुकर्माभ्यं
गादि कारयित्वा कृतमध्याह्निकादिर्देशकालौ संकीर्त्य अमुकगोत्रस्यामुकशर्म
णः प्रेतस्य प्रेतत्वनिवृत्त्या पितृलोकप्राप्त्यर्थं अमुकगोत्रैः अमुकशर्मभिर्वसु
२४ रुद्रादित्यस्वरूपैरस्मत्पितृपितामहप्रपितामहैः सह सपिंडीकरणं मनाशादादशा
देपार्वणैकोद्दिष्टविधानेन करिष्य इति संकल्पयेत्॥ मातुः सपिंडीकरणे अमुक
गोत्राया अमुकदाया अस्मन्मातुरस्मत्पितामही प्रपितामही वृद्धप्रपितामहीभि
रिति विशेषः॥ एवं मात्रादि सपिंडनं ज्ञेयं॥ ततः कामकालसंज्ञक विश्वेदेवस्था

४६ दैव० पाद्यमिति विश्वेदेवमंडले सव्येन पार्वणवत्पाद्यं दत्वा। अमुकगोत्रामुक
शर्मन् प्रेत इदं ते पाद्यमिति प्राचीनावीति मध्ये मंडले प्रेताय ४

अंत्ये० नेक्षणं दत्वा नवद्भिः प्रसादः कर्तव्यः॥ प्रेतस्थाने क्षणं उपतिष्ठतु॥ प्रेतस्य पितृपि
४५ तामहस्थाने क्षणं दत्वा नवद्भिः प्रसादः कर्तव्यः॥ इति क्षणं दत्वा॥ मंडलत्रयं कु
२ प्रपिता मह २ र्यात्॥ उत्तरे वैश्वदेवं मंडलं चतुष्कोणं दक्षिणे प्रेत मंडलं त्रिकोणं॥ ततोपि दक्षि
णे पितामहादिमंडलं वर्तुलं॥ कामकालसंज्ञका विश्वेदेवाः पाद्यं दत्वा॥ पार्वणवद
मुकगोत्र अमुकशर्मन् वत्तातिनरित्यादिक्रमेण दक्षिण मंडले त्रिभ्यः पाद्यं दद्या
त्॥ कर्तापादौ प्रक्षाल्य द्विराचम्य॥ उपक्रांतं सपिंडीकरणश्राद्धं करिष्ये इति सं
कल्पयेत्॥ अत्रैवा पूर्वोक्तसंकल्पः कार्यः॥ अपहता असुरा रक्षांसि इत्यका॥ प्रेपा ४५
कामकालसंज्ञकानां विश्वेषां देवानां इदमासनमिति प्राङ्मुखः ब्राह्मणद्वयस्या
सनं दत्वा॥ अमुकगोत्र अमुक प्रेताय इदमासनमुपतिष्ठतु॥ इति उदङ्मुखाय।

सनं दत्वा॥ अमुकगोत्रायेत्यादि ततस्त्रेत पितामहायेत प्रपितामहायेत्यादि
उदङ्मुखे २ क्रमेण प्रेतपूर्वनामगोत्रेभ्यस्त्रिभ्यः आसनं दद्यात्॥ तिलान्विकीर्याघ्यार्थं एकपा
त्रमासाद्य ततः पूर्वतः पात्रत्रयमासाद्य प्रेतपात्रे चतुःकुशं कूर्चं निधाय पात्रां
तरे त्रित्रिकुशं निधाय आसिच्य प्रेतपात्रे महैकोदिष्टवत्॥ तिलासीति मं
त्रोडेन तूष्णीं वा तिला क्षिप्ता॥ पितृपात्राणि शंनो देवीरित्य निमंत्र्य॥ पितृपात्रा
णि संपन्नानीत्यादि इष्टवृत्त्यर्घ्य इति निवेदयेत्॥ ततः प्रेतपात्रस्थमेकं पवि
त्रं प्रेतस्थानीय ब्राह्मणहस्ते दत्वा तत्पात्रस्थमुदकं किंचिद्गृहीत्वामुकगोत्रा
मुकशर्मन् प्रेत इदं ते र्घ्यमुपतिष्ठतामिति अर्घ्यं दत्वा॥ अमुकगोत्र अमुक
प्रेतपात्रोदक अमुकगोत्राणाममुकशर्मणा प्रेतपितृपितामहप्रपितामहानां

म१

अत्ये० अर्घ्यपात्रोणोदकेन संयोजयिष्ये॥ इति पृष्टे संयोजयेदिति ब्राह्मणैरुक्ते रिते
४६ प्रेतपात्रस्थं कुशत्रयं पितृपात्रेषु दत्वा प्रेतार्घ्यपात्रजलं वक्ष्यमाणमंत्रैः किं
चित्किंचित्संयोज्यावशिष्टेन पश्चात्प्रेतायार्घ्यं दद्यादित्यर्थः॥ मंत्रास्तु ये समा
नाः समनसः पितरो यमराज्ये। तेषां लोकः स्वधा नमो यज्ञो यज्ञेषु कल्पतां॥
ये समानाः समनसो जीवा जीवेषु मामकाः। तेषां श्रीर्मयि कल्पतामस्मिंल्लोके
सं०२८धु४ शतं समाः॥ संगच्छध्वं संवो मनांसि जानतां॥ देवाभागं यथा पूर्वे संजानाना उ
पासते॥ समानो मंत्रः समितिः समानी समानं मनः सह चित्तमेषां समानं मं
त्रमभिमंत्रये वः समानेन वो हविषा जुहोमि॥ समानी आकूतिः समाना हृद श्रेया
यानि वः॥ समानमस्तु वो मनो यथा वः सुसहासति॥ इति मधुवाते ति त्र्यचमपि ४६

पठेदिति केचित्॥ अमुकगोत्रामुकशर्मन्प्रेत अमुकगोत्रैः अमुकशर्मभिः पि
तृपितामहप्रपितामहैः सह सायुज्यं गच्छेत्युक्त्वानंतरं पित्रादिपात्रोदकेन पा
र्वणवतेभ्यो अर्घ्यं दत्वा गंधपुष्पाच्छादनादि यथाक्रमं सर्वेभ्यो दद्यात्॥ प्रेतस्थाने वि
शेषेण तत्र अग्नौकरणं क्षयंकार्यं॥ भोजनार्थाहृतान्नं किंचिदन्नं घृतं गृहीत्वामु
कगोत्रायामुकप्रेताय स्वाहेत्येकाहुतिं प्रेतब्राह्मणपाकरे कृत्वा पात्रांतरे सघृत
मन्नमादाय पार्वणवत् पितृब्राह्मणहस्ते सौनाग्नौकरणं कृत्वा प्रेतस्थाना
त्त्यंनंव कौ क्षिपेत्॥ प्रेतस्थाने तु वा पाणिहोमः॥ पित्र्ये कृतमन्नं परिविष्टं तेनैव श्री
कस्य छायानाशो न विद्यते इति वचनात्॥ ततोन्नं परिविष्य॥ दैवे उपवीते पात्र
मित्यादिकामसंजकोमो विश्वेभ्यो देवेभ्य इदमन्नमित्यादि पार्वणवत्॥ ततः प्र
२ सन्न भुंजीत॥ यत्र पात्रान्त स्वेद दं यज्ञान्यदुपर्क। स्पेती। ाकीभावेन ३

अंत्ये० पमपात्रे पृथिवी ते पात्रमित्यादि अत्रामुकशर्मप्रेतो देवतेति विशेषः॥ ततः अमु
४१ कगोत्रायामुकशर्मणे प्रेतायेदमन्नमुपतिष्ठतामिति प्रेतस्थाने संकल्प्य पित्रा
दिस्थानत्रये पार्वणवत्॥ भोजनांते उच्छिष्टपिंडो देयः तदनंतरं पिंडदानं॥ उ
६४ च्छिष्टसमीपे प्रोक्ष्योल्लिख्याप उत्सृज्य दर्भैरवस्तीर्य अमुकगोत्रायामुकप्रे
तायैते पिंड उपतिष्ठतामित्येकं पिंडं प्रेतोद्देशेन दत्वा॥ तद्दक्षिणतः पंक्तिरूपे
णपार्वणवत्॥ पित्रादिभ्यः पिंडत्रयं दद्यात्॥ यद्वा पूर्ववत् प्रेताय तत्पश्चिमे
त्रीन् पिंडान् पित्रादिभ्य इति॥ ततः प्रेतस्थाने तु दक्षिणां दत्वामुकप्रेतस्य पदत्तं प्रयो
श्राद्धं तदक्षय्यमुपतिष्ठतामित्युक्त्वा विप्रेभ्यो दक्षिणां दत्वाभिरम्यतामिति ४१
विसर्जयेत्॥ सहैव वा दक्षिणा विसर्जने भवतो नो॥ ततः अमुकगोत्रस्यामुक

प्रेतस्य पिंडं पित्रादिपिंडैः सह संयोजयिष्ये॥ इति पृष्ट्वा संयोजयेति द्विजैः प्रत्युक्तैः
मधुवाता ऋतायते मधु क्षरंति सिंधवः॥ माध्वीर्नः संत्वोषधीः मधु नक्तमुतोष
सो मधुमत्पार्थिवं रजः॥ मधु द्यौरस्तु नः पिता॥ मधुमांनो वनस्पतिर्मधुमां
अस्तु सूर्यः माध्वीर्गावो भवंतु नः॥ मधुवाता इति तृचेन कुशेन प्रेतपिंडं त्रिधा विभ
ज्यावयवत्रयं त्रिषु पिंडेषु योजयेदित्येभिर्मंत्रैः पूर्वोक्तैः ये समानाः समनसः पि
तरो यमराज्ये॥ तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतां॥ ये सजाताः समनसो
जीवा जीवेषु मामकाः तेषां श्रीर्मयि कल्प्यतामस्मिंल्लोके शतं समाः संगच्छध्वं
संवदध्वं सं वो मनांसि जानतां॥ देवा भागं यथा पूर्वे संजानाना उपासते॥ समानो
मंत्रः समानी समानं मनः सह चित्तमेषां समानं मंत्रमभिमंत्रये वः समानेन वो

अंत्ये० हविषा जुहोमि॥ समानीव आकूतिः समाना हृदयानि वः समानमस्तु वो मनो य
५८ था वः सुसहासति॥ ततोमुकगोत्रामुकप्रेतामुकगोत्रेणामुकशर्मणा स्वपित्रा संसृ
जस्वेति वदन् प्रेतपिंडं॥ प्रथमभागं तत्पितृपिंडे संयोज्य दधिमधुभ्यां मिश्री कुर्यात्
मधुवातेति त्रचमुक्त्वामुकगोत्रामुकशर्मन् प्रेतामुकगोत्रेणामुकशर्मणा स्वपिता
महेन संसृज्यस्वेति वदन् प्रेतपिंड द्वितीयभागं प्रेतपितामहपिंडे संयोज्य दधिम
धुभ्यां मिश्रीकुर्यात्॥ एवमेव वदन् प्रेतपिंड तृतीयभागं प्रेतप्रपितामहपिंडे संयोज
येत्॥ दधिमधुभ्यां मिश्रीकुर्याद्वा॥ एवं मात्रादि सपिंडे पितामह्यादि पिंडत्रये सं त्रये। ५८
योजयेत्॥ प्रतिपिंडसंयोजनं ये समानाइत्यादीनां सर्वमंत्राणामावृत्तिः ततः अ
त्र पितरो मादयध्वं इत्यादि सर्वं पार्वणवत्॥ किंचित्तु प्रेतपिंडावयवत्रयेण सं

योजितां त्रिपिंडानिदानीं तेन मृतमारभ्य पुरुषत्रयपार्वणवत्पुनरितिनामगोत्राद्यु
च्चार्य दद्यादित्याकः॥ द्वादशाहांतं धारीतमुत्तरीयं पिंडोपरि दद्यात्॥ तच्चाचार्योगृ
ह्णीयात्॥ अवयवपिंडान् पाकस्थालीं चाचार्याय देया॥ ततः एष वो नु गतः
प्रेतः पितृयज्ञमवाप्नुयात्॥ भुनेनवतुशेषाणं जायतां चिरजीविनः॥ इमं मंत्रं पठे
त्॥ ततो विकिरदयं दद्यात्॥ शिवआपः संत्वित्यादि सर्वं पार्वणवत्॥ प्रेतस्थानीयो वि
प्रायेतरभ्यो द्विगुणदक्षिणां दत्वा वाजेवाजे इत्यादिरभिरम्यतामिति विसर्जयेत्॥
ॐ स्वस्तिवाविसर्जनं॥ आसीमांतमनुव्रज्य पिंडान् गंगादौ प्रक्षिप्य॥ स्नात्वा गृहमा
गत्य वैश्वदेवादि त्वास पिंडीकरणश्राद्धशेषमन्नमन्यथायथाचारमिष्टैः सह भुंजी
त श्राद्धनोजिनोपि सचैलं स्नानं कुर्यात्॥ अत्र श्राद्धे नोक्तानां मिथः स्पृष्टौ तदंते मस्तु

ततस्तुल्कागायत्र्यष्टशतंजपेत्॥ उच्छिष्टसिक्ते तत्प्रक्षाल्यचुल्का॥ स्नात्वाद्विशतंजपेत्॥
उच्छिष्टभोजनेसहस्रंजपेत्॥ इदंमातुःसपिंडीकरणंसहगमनेमंत्रेवैकेन॥ तदादि
निर्णयः॥ तन्नयथाब्राह्मणाःस्मृ॥ तदभावेपितामह्यादिभिः॥ सहपत्न्यामृतमातृ
केपामात्रादिभिःसह॥ अमृतमात्रेकेणतुपितामह्यादिभिरित्यादिसर्वंनिर्ण
यावसरेवक्ष्यमाणः॥ इत्यौर्ध्वदेहिकेसपिंडीकरणंसमाप्तं॥ ॥अथद्वादशेत्र
योदशेवाह्निप्रातःस्नात्वाप्राणानायम्यतिथ्यादिस्मृत्वाअमुकगोत्रस्यामुकश
र्मणःप्रेतलोकात्पितृलोकगमनेसुखसिध्यर्थममुकशर्मणामस्मत्पितृपिताम
हप्रपितामहानांवसुरुद्रादित्यस्वरूपाणांपाथेयश्राद्धंसदैवंसपिंडंकरिष्यइ
तिसंकल्प्य॥ पाद्यादिसर्वश्राद्धंपार्वणवत्सकोनेनामानेनवाकुर्यात्॥ ततःक ४९
र्ताभ्यागतानांकृत्वादेशकालौस्मृत्वासपरिवारस्यमेसकलारिष्टोपशांतये
क्षेमायुःसिध्यर्थंचगणेशपूजनपूर्वकंस्वस्तिवाचनंकरिष्ये॥ यथाशीखंस्वस्त्यय

नंवाचयित्वा॥ ॥आशिषोगृहीत्वाबंधुभिःसहभुंजीत॥ कृतऊर्ध्वंश्रीखंडधारणं
तांबूलभक्षणादिकुर्यात्॥ ॥अथउदकुंभश्राद्धं॥ ॥तत्रयाज्ञवल्क्यः॥ अर्वा
क्सपिंडीकरणंसंवत्सराद्भवेत्॥ तत्रयाज्ञवल्क्यः॥ तस्याप्यन्नंसोदकुंभंदद्या
त्संवत्सरंद्विजे॥ गौतमः॥ अदैवपार्वणश्राद्धंसोदकुंभमनर्धकं॥ कुर्यात्प्रत्या
ब्दिकाद्याधात्संकल्प्यविधिनत्वदं॥ अधर्मकमपुनर्भोजनादिनियमप्रति
रहिते॥ तथाचेदंकृतेअकृतेवासपिंडनेत्रयोदशादिनादारभ्ययावद्वर्षंप्र
तिदिनंकार्यं॥ ॥अशक्तौप्रतिमासं॥ तथाकृतेसपिंडनेएकोद्दिष्टं॥ तथै
वसर्वंकुर्यादिति॥ ततोवर्षांतदिनेसंवत्सरविमोक्षश्राद्धंपार्वणविधिनाश
क्यान्हरिब्राह्मणोप्रथमाद्धेविहितनिविधानि॥ तत्रधवलनिबंधेदेवलः॥ प्र
मीतोपितरौयस्यदेहस्तस्याशुचिर्भवेत्॥ नदैवंनापिवापित्र्यंयावत्पूर्णो
नवत्सरः॥ तथा॥ महागुरुनिपातेतुप्रेतकार्यंयथाविधिः॥ कुर्यात्संवत्स
राद्वर्जिकोद्दिष्टंनपार्वणं॥ ॥अन्यदीयमित्यर्थः॥ ॥स्नानंचैवमहादानं

स्वाध्यायं चाग्नितर्पणं॥ प्रथमेऽब्दे न कुर्यात्तु महागुरुनिपातने॥ तथा॥ ॥सर्वे
षां प्रेतकार्याणि महागुरुनिपातने॥ कुर्यात्संवत्सरादर्वाक् श्राद्धमेकं तु वर्ज
येत्॥ ॥स्मृत्यं॥ ॥माता चैव तथा भ्राता भार्या पुत्रस्तथा स्नुषा॥ एषां मृतौ च
रेच्छ्राद्धमन्यस्य न पितुः सुतः॥ तथा॥ माता चैव स्वनीभ्राता पत्नी चैव विपद्यते॥
तत्र श्राद्धानि कुर्वीत न कुर्यात्तिनके मृते॥ एतत्सर्वं वर्षपर्यंतं महा
ते सपिंडने ज्ञेयमिति केचित्॥ ॥अन्यत्र॥ ॥अस्थिक्षेपं गयाश्राद्धं श्रा
द्धं च परपाक्षिकं॥ प्रथमाब्दे न कुर्वीत कृते पि तु सपिंडने॥ ॥अस्यापवादः
अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपाक्षिकं॥ प्रथमेऽब्दे पि कुर्वीत यदि स्या
द्भक्तिमान्सुतः॥ इति भक्तिमान् मन्यापरपक्षश्राद्धदेवता त्वयोग्यतो संपाद ५०
कं श्राद्धं तत्रात्॥ एतत्कुर्यात्तेनाति कुर्यादित्यर्थः॥ अन्ये तु यथा क्रमं तेषा
च क्षत एकस्य च विषयत्वे विवेकोस्मत्कृते त्रिस्थलीसेतौ गयाप्रकरणे
वर्णितव्यः॥ ॥अथ पालाशप्रतिकृतिदाहविधिः॥ ॥तत्र देशांतरम

रणे परोक्षं शवमस्थि लब्धाभावे वास्थिनि दहेत्॥ ॥सद्यास्थीनि चांडालस्पृष्टादीनि
स्पृष्टान्युक्तवा पंचगव्यं गंगोदकेन प्रक्षाल्य विधिना दहेत्॥ ॥अथास्थि
न्यपि लब्धे तेन तस्य पर्णशरदाहः॥ तत्रैवं॥ ॥भुवि कृष्णमृगचर्मास्ता
यतदुपर्येकं शरं दक्षिणोत्तरायतं निवेश्य तदुपरि पालाशत्रिशतानि न्यसे
त्॥ शिरसि चत्वारिंशत्॥ ४०॥ ग्रीवायां दश १० बाह्वोः प्रत्येकं पंचाशत् १००
करांगुलिषु सर्वासु दश १० उरसि विंशतिः २० जठरे त्रिंशत्॥ ३० शि
श्ने चार्ध ४ अंडयोः स्त्रयस्त्रयं॥ ६ ऊर्वोः प्रत्येकं पंचाशत् १०० जंघा–
पादनखांतयावत्पादयोः प्रत्येकं पंचदश ३० सर्वासु पदांगुलीषु दश १०
एवं षष्ठ्याधिकशतत्रयमितैः पर्णशरैः॥ शरीरं निर्माय ऊर्णासूत्रेण संब
ध्वा जलोद्रियवपिष्टेनानुलिंपेत्॥ ततः शक्तौ सत्यां वक्ष्यमाणान्यपि को
र्याणि॥ मूर्ध्नस्थाने कदलीफलं॥ शिरसि नारीकेलं॥ ललाटे कदलीपत्रं॥
दंतेषु दाडिमबिजं॥ कर्णे कंकणं॥ नेत्रे कपर्दकैः॥ नासिकायां तिलपुष्पं

नासौ आम्रं॥ स्तनयोः जंबीरफलद्वयं॥ वाते मनश्शीलं॥ पित्ते हरितालकं॥
कफे समुद्रफेनं॥ रुधिरे मधु॥ पुरीषे गोमयं॥ मूत्रे गोमूत्रं॥ रेतसि पारदं
हे वृषणयो वृंताकद्वयं॥ शिश्ने गृंजनं॥ केशेषु वनसूकरसटाः लोम
सु कूर्चं॥ मांसस्थानेन यवपिष्टेन वा लिंपयेत्॥ ततः पंचगव्यमंत्रैः पंच
गव्येन प्रोक्षयेत्॥ पंचामृतमंत्रैः पंचामृतेन॥ पुनर्नो असुमिति द्व्यृ
चस्यतः प्राणस्त्रिष्टुप्॥ पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुन
रंतरिक्षं॥ पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां३ या स्वस्तिः॥ इति प्राण
प्रवेशयेत्॥ यद्वा॥ यत्ते यमं वैवस्वत मिति सूक्तेन प्राणानानीय॥ ॐ यत्ते य
मं वैवस्वतं मनो जगाम दूरकं॥ तत्त आवर्तयामसीह क्षयाय जीवसे॥ यत्ते दिवं य
त्पृथिवीं मनो० तत्त० यत्ते भूमिं चतुर्भृष्टिं मनो॥ तत्त आ० यत्ते चतस्रः प्रदिशो
मनो ज॥ तत्त० यत्ते समुद्रमर्णवं मनो ज० तत्त आ० यत्ते मरीचीः प्रवतो म
नो० तत्त० यत्ते पर्वतान्बृहतो मनो० तत्त० यत्ते विश्वमिदं जगन्मनो जगाम

तत्त० यत्ते पराः परावतो मनो जगाम॥ तत्त आ॥ यत्ते भूतं च भव्यं च मनो० तत्त आ॥
२॥ ॥इति सूक्तेन प्राणानानीय॥ शुक्रमसि ज्योतिरसि इति मंत्रेण पारदं क्षि
प्त्वा अक्षीभ्यां इति सूक्तेन षट्ऋचेन शरीरं स्पृशेत्॥ शरीरं पवित्रं॥ ॥तच्छरीरं स्ना
पयित्वा॥ चंदनेनानुलिप्य॥ वस्त्रोपवीतैः परिधाप्यालंकृत्वा अयं स देव इति
तमभिमृशेत् चास्योपासनमित्यग्निं ध्यात्वा॥ वैतरण्यादिदानपूर्वकं ऊर्णा
सूत्रेण वेष्टयित्वा कृष्णाजिनेनाच्छाद्य पूर्वोक्त + अक्षीभ्यां नासिकाभ्यां कर्णाभ्यां
छुबुकात् अधि यक्ष्मं शीर्षण्यं। जिह्वाया विवृहामि ते। ग्रीवाभ्यस्त उष्णि
— हाभ्यः कीकसाभ्यो अनूक्यात्॥ यक्ष्मं दोषण्यं १ मंसाभ्यां बाहुभ्यां विवृहा
मि ते॥ आंत्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि यक्ष्मं मतस्नाभ्यां यकृतः प्लाशि
भ्यो विवृहामि ते॥ ऊरुभ्यां ते अष्ठी — वद्भ्यां पा — र्ष्णिभ्यां प्रपदाभ्यां। यक्ष्मं श्रोणिभ्यां
भासदाद्भंससो वि। मेहनाद्वनंकरणात् लोमभ्यस्ते नखेभ्यः यक्ष्मं सर्वस्मादात्मन

अं०सं० ५२

त्वमिदं विसृजामि॥ अंगादंगाल्लोम्नोलोम्नात् पर्वणिपर्वणि॥ यस्मैसर्वस्मादात्मनस्त्व
मिदं वि०॥ २ शो+ विधिनाशववद्दहेत्॥ पालाशहंतनाभावे कुशैः प्रतिकृतिं कुर्यात्
आहिताग्ने प्रतिकृतिं दहेत्स्नानादाहे वा दशाहमेवाशौचं॥ अनाहिताग्नेस्तु त्र्यहं॥
पर्णदाहे शरपुत्रपत्न्या गृहीताशौचयोर्दशाहादि पूर्णमेव॥ गृहीताशौचयोस्तु
तयोपि त्र्यहाशौचं॥ पत्नीः पुनः संस्कारे पत्न्याश्चैवमेवाशौचं॥ न च संध्यादिकर्म
लोपः॥ अथ पुनः संस्कारे कालशुद्धिः॥ ॥ आशौचमध्ये पुनः संस्कारे यथा
संभवं दिनां शोध्यं॥ कालांतरे तु शोध्यमेव॥ संवत्सरादूर्ध्वं प्रेतकार्ये उत्तरा
यणः श्रेयात्॥ तत्रापि कृष्णपक्षे तिथिषु नंदा त्रयोदशी चतुर्दशी। दिनक्ष ५२
यं च वर्जयेत्॥ शुक्रशनिवारौ वर्ज्यौ। नक्षत्रेषु भरणी कृत्तिकाश्लेषा मघा
धनिष्ठादि पंचक त्रिपुष्कराणि चान्ति उग्राणि सर्वथा वर्ज्या॥ व्यतिपाते परि
घे वैधृतौ च योगे विशिष्टकरणे चतुर्थाष्टम द्वादशस्थे चंद्रे चाति दोषः रोहिणी

मृगशीर्ष पुनर्वसु पूर्वोत्तरा चित्रा विशाखानुराधा पूर्वाषाढोत्तराषाढानि त्रिपुष्करा
णि च षट् उग्राणि सं नवे वर्ज्यानि॥ शिष्टान्याग्रुप्तानि॥ सर्वथा दिनशुध्यसंभवेत्वन
ति उग्रवा धनक्षत्रं ग्राह्यं पुनः संस्कारं आंतरं ग्राह्यं॥ नंदायां शुक्रे चतुर्दश्यां त्रिज
न्मनक्षत्रेषु एकोद्दिष्टमिति निषेधः एकोदशाहादौ न निषेधः॥ तत्र तिथ्यादिनै
शोध्यं॥ युगादि मन्वादि संक्रांत्यमावास्यासु प्रेतकार्ये पुनः संस्कारे च किंचिदपि
नैव शोध्यं॥ अथाधिकारिणः सर्वत्र दाहपिंडादि ज्येष्ठपुत्र औरसपुत्र कुर्यात्
तदसंनिधौ कनिष्ठः तेषां सर्वेषां मसंनिधौ पौत्रो ज्येष्ठपुत्रादि क्रमेण॥ तदभा
वे तथैव प्रपौत्राः तेषामभावे पुत्रिकापुत्रे वा॥ यः पुत्राक्रमेणा तदभावेन दत्त
त्रादयः पूर्ववत्॥ उक्ताभावे पत्नी॥ एवं पुत्राद्यभावे पत्न्याभ्राता॥ तदभावे पत्नी
पत्न्यभावे भ्रातृपुत्राभ्रातामातुलाभ्याः दुहितादौहित्रः अन्यः सगोत्रः सपिंडः सब्र
ह्मचारी मित्रं शिष्यो गुरु बांधवो धनसंबंधि वा दद्यात्॥ न पुत्रस्य पिता दद्यात्॥

तुजस्य ग्रजस्तया॥ यदि स्त्रीहेतकुर्वीत सपिंडीकरणं विना॥ इहंसतिसंनवे॥ अ
दत्तकन्यायै पितरौ दत्तः अन्या नावेदत्तानामपितावेव॥ दौहित्रमातामहौ पर
स्परं॥ मातामहश्च दौहित्री जामातुः श्वशुरो मिथः श्वश्वादिस्नुषा भ्रातरौ च मि
थो दत्तः गुरुशिष्यो परस्परं॥ सर्वाभावे यः कश्चित्कुर्यात्तस्य सपत्न्यामिः॥ व
षत्रयानंतरं त्वजाताव पि और्ध्वदेहिकं संत्रवत्कुर्यात्॥ वर्षत्रयार्वाकृकृतचूडे
पिशाक्तौ सर्वमंत्रवत्कुर्यात्॥ यद्यशाक्तौ कृतचूडोवा तदाग्निदानमेव मंत्रव
त्कुर्यात्॥ शिष्टमन्येन कारयेत्॥ एव पत्न्याप्यग्निदानमात्रं संमंत्रकं कार्यं
शिष्टमन्येन कारयेत्॥ ॥तथाह कात्यायनः॥ असंस्कृतेन पत्न्या च ह्यग्नि
दानं समंत्रकं॥ कर्तव्यमितरं सर्वमंत्रवत्यैत्र मेधिकं॥ यद्यसौकृतचूडस्या
द्यदि स्याच्च त्रिवत्सरः॥ सपीडिकरणादर्वाग्विाग्नादी निश्राद्धानि विभक्तौ॥ वि
भक्तौसंति हित एक एव कुर्यात्॥ तत्र विभक्तैर्यथाशक्ति स्वकीय द्रव्यं देयं॥

गृह्यपरिशिष्टे॥ असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्॥ प्रथमेहनि यो दद्यात्स द
शाहं समापयेत्॥ तथा॥ प्रथमेहनि यद्देयं तद्देयं स्याद्दशाहिकं॥ तथा नत्ररीय शि
लापात्रकर्तृद्रव्य विपर्यये॥ देशविपर्ययेप्येवं॥ एकादशाहिकं तु दशाहकर्ता ज्ये
ष्टपुत्र एव कुर्यात्॥ कनिष्ठोपि वा कुर्यात्॥ न तु पुत्रादन्यः पुत्रे सति नान्यस्तत्रा
धिकारी॥ तथा॥ यवीयसा कृतं कामं प्रेतश्राद्धं विभागतु॥ यज्ज्यायसापि क
र्तव्यं सपिंडिकरणं पुनः॥ विभक्ताः पुत्राश्चेत्कामाश्चेत्पृथक्पृथगपि सपिं
डिकरणं कुर्युः॥ अविभक्तास्तु ते पुत्रा वार्षिकादि ज्येष्ठ एव कुर्यात्॥ विभक्तास्तु ते
केपृथक्कुर्युः॥ ब्रह्मचर्यादीनां दहनोदकदानादि अधिकाराभावो वक्ष्यते॥
पाखंडादीनां मृतको नामाधिकारित्वादेपि दहनादिना कार्यं॥ तदाह याज्ञ
वल्क्यः॥ ॥पाखंडानाश्रिता स्तेना भर्तृघ्न्यः कामकामादिकाः सुराप्य आ
त्मत्यागिनो नाशौचोदकभाजनाः वेदबाह्यलिंगधारणं पाखंडः अनाश्रिता

अंत्ये० ५४ सत्यप्यधिकारेआश्रमविशेषरहितोस्तिनाब्राह्मणस्सर्वेषांव्यतिरिक्तोसम
श्व्यहारिणः सुराप्यइत्यादिउद्देश्यपगतंवा॥ लिंगमविवक्षितं॥ आशौच
मुदकंचैतन्मरणेनकार्यमित्यर्थः॥ आत्मत्यागिनोबुद्धिपूर्वकमात्मघाति
नस्तेषुविशेषमाहगौतमः॥ प्रायोनाशकशस्त्राग्निविषोदकोद्बंध
नप्रव्रजनशैलेभ्यश्छितामिति॥ प्रायोमहाप्रस्थानंअनाशकमनशनं॥ प्रप
तनंशैलाद्यधःपातः इत्यादिनिमित्तैः॥ शास्त्राविहितमार्गेणेच्छापूर्वकंम्र
तानामाशौचादिनेत्यर्थः॥ तथांगिरः॥ ॥चंडालादुदकात्सर्पाद्ब्राह्मणा
द्वैद्युतादपि॥ दंष्ट्रिभ्यश्चपशुभ्यश्चमरणंपापकर्मणां॥ उदकंपिंडदानं
चप्रेतेभ्योयत्प्रदीयते॥ नोपतिष्ठतितत्सर्वंअंतरिक्षेविनश्यति॥ आश्व राम० ५५
लायनपरिशिष्टेपि॥ ॥चांडालादित्याद्युक्त्वा॥ ॥नसंस्कारविधिस्तेषां
नैवकार्योदकक्रिया॥ रुदनंनैवकर्तव्यंसूतकंनचबंधुभिः॥ 'इच्छाशरी

रंप्रेतस्यसंक्षिप्यास्थिनियम्यततः॥ प्रायश्चित्तंतुकर्तव्यंपुनश्चान्द्रायणत्रयं॥ म
नुः॥ वृथासंकरजातानांप्रव्रज्यासुचतिष्ठतां॥ आत्मनस्त्यागिनांचैवनि
वर्तेतोदकक्रिया॥ वृथाजाताः पंचमहायज्ञरहिताः संस्कारजाताः प्रतिलो
मजाः प्रमादाद्बुद्धिपूर्वकनिमित्तैर्मरणेप्रायश्चित्तमुक्तंचांडालान्निहतेविप्रे
त्वंतरिक्षमृतेपिवा॥ कृच्छ्रातिकृच्छ्रचांद्रायणमुद्दिष्टमित्यपकीर्तितंति॥ तथा
विधेःप्रमादमरणेनवेत्पेवाशौचादि॥ तथांगिरः॥ अथकश्चित्प्रमादेन
म्रियतेप्युदकादिभिः॥ तस्याशौचंविधातव्यंकर्तव्याचोदकक्रियेति॥ प्रमा
देचांद्रायणंतप्तकृच्छ्रपंचकार्यं॥ तथापंचदशकृच्छ्राणिकुर्यात्॥ ततोविधि
नाहाद्दिशुद्धाचांडालादिमृतानामाहिताग्नीनांप्रतिपत्तिःस्मृतायुक्ता॥ वैतानं
प्रक्षिपेदप्सुअवसथ्यंतुचैवपथि॥ पात्राणितुदहेदग्नौयजमानेवृथामृते॥
वृथाविहितमार्गेणतेषांशरीरंगंगायामन्यत्रवामन्त्रानद्यांक्षिपेत्॥ यदा

लौकिकाग्नौ अमंत्रकं दग्ध्वा अस्थीनि स्थापयेत्॥ प्रायश्चित्तं नारायणबल्यादिकं
त्वा तदस्थीनि क्षीरेण क्षालयित्वा विधिना दहेत्॥ श्राद्धं च कुर्यात्॥ प्रायश्चित्तना
रायणबलिवत्सरांते लोकगर्हापरिहारार्थं श्राद्धादौ योग्यत्वार्थं च कार्यौ॥ ना
रायणबलिः कार्यो लोकगर्हाभयान्नरैः॥ तथा तेषां नवेच्छौचं नान्यथेत्यत्र वी
निषद्धकृतः॥ तेषां पाखंडादीनां बुद्धिपूर्वात्मघातकानां चेत्यर्थः॥ आ॰ येषामं
विनः पुत्राद्यः संतिरात्मघातकप्रायश्चित्तं द्विगुणं चांद्रायणं तप्तकृच्छ्रं चतुष्टयं
च॥ यद्वा त्रिंशत्कृच्छ्राणि कृत्वा॥ पाखंडादीनां योग्यं सर्वं प्रायश्चित्तं तु कृत्वा ना
रायणबलिं च कृत्वा तद्दैवकालांतरे वा वत्सरादर्वागपि दाहश्राद्धादि कुर्युः॥ अनित्य
बालायुषः अकृतनिः कृतीनां पाखंडादीनां शवानां स्पर्शने स्नानालंकरणे वं
हनरज्जुच्छेदनदहनाश्रुपातकथादीनां स्नानं कृत्वा महासांतपनं चरेत्॥ ज्ञाना
तप्तकृच्छ्रं॥ एतेषु केकेककरणे वा ज्ञानाज्ञानाउपवासः॥ मृत्याभ्यासे कृच्छ्रातिकृच्छ्रं चांद्रा

णियोगतया कुर्यात्॥ यत्तु कथादिरकित्स्यगुरुव्याधियुतः प्रत्याख्यानानिषक्
क्रियो बुद्धिपूर्वकमप्यात्मानं घातयन्निप्रयागादौ वा न तस्य दोषः शास्त्रोक्त
नमरणत्वात्तस्य प्रायश्चित्तनारायणबलिनक्तः॥ त्रिरात्रमेवाशौचं॥ चतुर्थ
दिने एकदशाहकृत्यं॥ पंचमे सपिंडनं॥ त्र्यहाशौचे पि पिंडास्त्रयः॥ दशावा
तत्र चैनेवाह्निपिंडत्रयं दशांजलिप्रक्षेपत्रयोंजलयः॥ शानाजलिप्रक्षेत्रिं
शत्॥ मध्येऽह्नि पिंडचतुष्टयं॥ अनारभ्य त्रिंशदा अंजलयः द्वितीयदिने स्थीसं
चयं॥ एवमन्यत्रापि त्र्याहाशौचे॥ ब्रह्मचारिभिः पूर्वोक्तपाखंडादिभिः पतितैः
प्रक्रांतप्रायश्चित्तैत्वत्रैश्च सपिंडादिमरणे दहनाशौचोदकदानादि नाकार्यं
ब्रह्मचारिप्रक्रांतप्रायश्चित्तमातापितृमहागुरुमातामहमातामहाचार्योपा
ध्यायानां कुर्यादेव तत्र व्रतलोपो नास्ति॥ किंतु स्नातकान्नं नाश्नीयात्॥ न स्ना
तकैर्भिः सहवसेत्॥ तत्र दिक्त्वानिरिक्तप्रेतकर्मकरणे पुनरुपनयनं॥ ब्रह्म

अंत्ये० ५६ चारिणः॥ याज्ञवल्क्यः॥ ॥एवं मातामहाचार्यप्रेतानामुदकक्रिया॥ कामोदकं
सखिप्रत्तास्वस्त्रियश्वशुरर्त्विजां॥ कामोदकमित्युक्तेः सख्यादावावनेपि न दो
षः॥ यमेनांजलिसंख्यायां विशेष उक्तः पाषाणं तत आदाय विप्रे दद्याद्दशांज
लीन्॥ द्वादश क्षत्रिये दद्याद्वैश्ये पंचदश स्मृताः त्रिंशच्छूद्राय दातव्यास्ततः
संप्रविशेद्गृहं॥ षोडशश्राद्धानि॥ ॥मासिकानि दशैकं च आद्ये द्वे ष्यार्धमा
सिके॥ ऊनाब्दूनषण्मासे प्रेतश्राद्धानि षोडशः अथ्यर्धमासिकं पत्रे पक्षिकं
नवश्राद्धं सपिंडीतं श्राद्धान्युपि षोडश॥ एकैनैव तु कार्याणि संभविन्नकथ
नेषपि॥ तत्रवषयांगं सर्वैर्द्धर्देयं॥ यत्तमद्यः शौचं तत्र शंखः॥ सद्यः शौ राम
चेपि दातव्यं प्रेतस्यैकादशेहनि॥ स एव दिवसस्तस्य श्राद्धपिंडोदकादिषु॥ ५६
शय्यासनादि[illegible] इति पाठः॥ एकाहशौचे तु दशाहकृत्यं॥ तन्मिश्रेवोदका
दशोदशाहः नवश्राद्धमासिकयोर्विप्रेकण्वः नवश्राद्धमासिकं च यद्यदंत

रितं न देत्॥ तत्तदुत्तरस्मात्तं श्राद्धनुष्ठेयं प्रवक्षते॥ अंगिराः॥ प्रथमेहनि तृतीये द्वि
पंचमे सप्तमे तथा॥ नवमैकादशे चैव तन्नवश्राद्धं प्रकीर्तितं॥ शिवस्वामी॥ नव
श्राद्धानि पंचाहुराश्वलायनशाखिनः॥ आपस्तंबाः षडित्याहुर्विभाषा ते
त्तिरीयिणः॥ पंच एकादशाहिकव्यतिरेकेण भविष्यपुराणे॥ वर्णेनोपिद्व्यव
स्था॥ नवसप्तविंशां राज्ञां नवश्राद्धान्यनुक्रमात्॥ आद्यंतयोर्वर्णयोस्तु ष
ड्भ्याहुर्महर्षयः॥ विशां नवः राज्ञां सप्त॥ तथा॥ ॥प्रेतश्राद्धे तु यत्पात्रमर्घ्या
र्थं परिकल्पितं॥ तस्यैवो नानाला भोक्ताशेपि पून्युज्यतामत॥ प्रेतश्राद्धे नवि
किरहनि स्मृतिरत्नावल्यां॥ तथा॥ द्वादशाहे यथा कुर्यात्पितुः पुत्रसपिंडनं
एकादशेह्नि कुर्वीत प्रेतश्राद्धानि षोडश॥ वस्त्रालंकारशय्यादि पितुर्यद्वाह
नादिकं॥ गंधमाल्यैः समभ्यर्च्य श्राद्धभोक्ते न दर्पयेत्॥ तथा॥ आशिषो द्विगु
णादर्भा जपाशीः स्वस्तिवाचने॥ पितृशब्दः स्वसंबंधः शर्मशब्दस्तथैव च॥
पात्रालंबोह गार्हस्थ्य उल्मुकोल्लेखनादिकं॥ तृप्तिप्रश्नं च विकिरं शेषप्रश्न

स्तथैव च प्रदक्षिणाविसर्गश्च सीमंतागमनं तथा॥ अष्टादशपदार्थं च प्रेतस्योद्वि
सर्जयेत्॥ सपिंडीकरणं यावदृजुदर्भैः पितृक्रिया॥ सपिंडीकरणादूर्ध्वं द्विगुणैर्
विधिवद्भवेत्॥ पतिपुत्रवती नारी भर्तुरग्रे मृता यदि॥ वृषोत्सर्गं न कुर्वीत गां तु
दद्यात्पयस्विनीं॥ अन्वारोहणे तु॥ नवश्राद्धानि सर्वाणि सपिंडीकरणं पृथक्
एक एव वृषोत्सर्गो गौरेका तत्र दीयते॥ यतिं प्रति शातातपः॥ एकोद्दिष्टं जलं पिं
डमाशौचं प्रेतसत्क्रियां॥ न कुर्यात्पार्वणादन्यद्ब्रह्मीभूताय भिक्षवे॥ उशना
नः॥ एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा॥ अहन्येकादशे प्राप्ते पार्वणं तु वि
धीयते॥ सपिंडीकरणं तेषां न कर्तव्यं सुतादिभिः॥ त्रिदंडग्रहणादेव प्रेतत्वं
नैव जायते॥ ॥मातृविशेषे शंखः॥ मातुः सपिंडीकरणं कथं कार्यं न वे राम
त्तैः॥ पितामह्यादिभिः सार्धं सपिंडीकरणं स्मृतं॥ कारिकायां॥ पितामह्या ५७
दिभिः सार्धं मातरं तु सपिंडयेत्॥ ॥अन्वारोहणे तु यमः॥ पत्या चैकेन क
र्तव्यं सपिंडीकरणं स्त्रियाः इति॥ पत्नीविषये पैठीनसिः अपुत्रायां मृतायां

तु पतिः कुर्यात्सपिंडनां॥ श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेत्॥ स
पिंडीकरणे ज्येष्ठस्यैवाधिकारः॥ तदुक्तं वायुपुराणे॥ श्राद्धानि षोडशादत्त्वा
कुर्यान्न तु सपिंडनं॥ प्रोषितानामपि तेन पुत्रः काकालापि चिरादपि॥ यदि षोडश
श्राद्धानि कनिष्ठा भ्रात्रादिभिस्तदा सपिंडनमेव कुर्यादित्यपरार्के॥ पितृश्रा
द्धं कुर्वन्यदि पुत्रो मृतस्तदा॥ न सुत पित्रोर्ध्वदैहिकानंतरं पितामहकृत्यं पुनः
संस्कारं कृत्वा सर्वमावर्तयेत्॥ अतीते दशाहे तु नैवं॥ तथा अशक्त्या पित्रानुज्ञा
तेन पौत्रेण पितामहदशाहे तु नैवं॥ श्राद्धे उपक्रांते पितृमरणे सति पित्राशौ
चं॥ वहन्नेव स्वकाले पितामहश्राद्धं पौत्रः कुर्यात्॥ प्रक्रांतत्वादिति मदनपारि
जाते मोनिलः॥ ॥द्वादशाहादिकाले तु प्रमादादननुष्ठितं॥ सपिंडीकरणं कु
र्यात्काले पुनरनाविषु॥ भू द स्यात्तु विष्णुः॥ मंत्रवर्जं हि शूद्राणां द्वादशेऽहनि
कीर्तितं॥ अमावास्याश्राद्धकारिशूद्रविषये मदपरार्के कल्पतरौ च॥ वचनव

अंत्ये० ५८ लाद्वाशौचमध्य एव कार्यं॥ यत्तु कात्यायनः॥ सर्वेषामेव वर्णानामाशौचांते सपि
ण्डनमिति तद्व्यतिरिक्तविषयं॥ ॥ब्रह्मपुराणे॥ ॥आशौचांते द्विवर्णानां
दशमं पिंडमुत्सृजेत्॥ श्राद्धांते पिंडदानां तेषु ध्यर्थं श्राद्धमाचरेत्॥ सपिंडी
करणं तु कामम् मृते तु ब्रह्मपुराणे॥ मृते पितरि यस्याथ विद्यते च पितामहः
तेन देयास्त्रयः पिंडाः प्रपितामहपूर्वकाः॥ तेभ्यश्च पैतृकपिंडो नियोक्तव्यश्च पू
र्ववत्॥ मातर्यग्रे मृतायां तु विद्यते च पितामही॥ प्रपितामहीपूर्वं तु कार्यस्त
त्राप्ययं विधिः॥ व्युत्क्रमाच्च प्रमीतानां नैव कार्यं सपिंडनं॥ तत्तु मातृपितृभ
र्व्यतिरिक्तविषयं॥ ॥अतएव स्कांदे॥ ॥व्युत्क्रमेण मृतानां न सपिंडीकृतिरि राम० ५८
ष्यते॥ यदि माता यदि पिता भर्ता नैष विधिः स्मृतः॥ एष विधिः सपिंडनिषेधरूपः
क्षत्रियादिरपि महैकोद्दिष्टमेकादशेऽह्न्येव कुर्यात्॥ ननु स्मृतिकोने॥ नत्वाह
वृद्धवसिष्ठः॥ ॥एकादशेऽह्नि श्राद्धं धनत्सम मान्यमुदाहृतं॥ चतुर्णामपि

वर्णानां मृतकानां तु पृथक् पृथक्॥ ॥लौगाक्षिरपि॥ ॥आद्यं श्राद्धमशुद्धोऽपि कु
र्यादेकादशेऽहनि॥ कर्तुस्तात्कालिकी शुद्धिः अशुद्धः पुनरेव सः॥ रुद्रगणश्राद्धं
तु क्षत्रियादिः सूतकांते कुर्यात्॥ एकादशेऽहनि तथा विप्रानेकादशेन तु॥ क्ष
त्रियादिः सूतकांते भोजयेद्युजो द्विजान्॥ इति पद्मपुराणात्॥ इदं रुद्रगण
परत्वेन व्याख्यातं॥ मदनपारिजाते गोभिलः॥ ब्राह्मणं भोजनं दाद्यं हीनवर्ण
नतेतया॥ पुनश्च भोजयेद्विप्रान् द्विरावर्तिर्भवेदिति॥ इदं चाद्यमासिकाद्यादि
कार्यं॥ सिध्यर्थं अंगिराः यस्य संवत्सरादर्वाक् सपिंडीकरणं कृतं॥ मासिकं चो
दकुंभं च देयं तस्यापि वत्सरं॥ पैठीनसिः॥ सपिंडीकरणादर्वाक् कुर्याच्छ्राद्धा
नि षोडश॥ एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु॥ प्रत्यक्षश्चेद्यो यथा कुर्या
त्तथा कुर्यात्सितानपीति शाट्यायनिः सपिंडीकरणादर्वाग् अपकृष्य गतान्य
पि॥ पुनरप्यपकृष्यन्ते हृद्धधुत्तर निषेधनात्॥ इति श्राद्धानंतरं निषेधार्थ

अंत्ये० अथरात्रौजननेमरणेरजोदर्शनादौचत्रयःपक्षाः॥अर्धरात्रपर्यंतंपूर्वदिनगण
५९ नावात्रियामायारात्रेर्भागद्वयंपूर्वदिनांतर्गतंवा॥सूर्योदयात्प्राग्विधिपूर्वदिनमे
वेतिवा॥तथाहकश्यपः॥उदितेतुयदासूर्येनारीणांदृश्यतेरजः॥जननंवावि
पत्तिर्वायस्यादहस्तस्यसंशयः॥अर्धरात्रावधिःकालःसूतकादौविधीयते
रात्रिंकुर्यात्त्रिभिर्भागैस्तुद्वौभागौपूर्वएववा॥उदयमीशःप्रभातेनयुज्यतेमृतसूतके
रात्रावेवसमुत्पन्नेमृतेरजसिसूतके॥पूर्वमेवदिनंग्राह्यंयावन्नाभ्युदितोरवि
॥अत्रदेशाचारातव्यवस्था॥ ॥अर्धरात्रादौदाहादिनिर्णयोदेवजानीये॥रा ५९
त्रौवारात्रिशेषेवाम्रियतेचदिनात्ययः॥दाहंकृत्वायथान्यायंद्वौपिंडौनिर्वपे
त्केत्कृतः॥ नियमः॥ ॥संध्यायांवातथारात्रौदाहपाथेयकर्मच॥नव
श्राद्धंचनोकुर्यात्कृतंनिःफलंभवेत्॥रात्रिमृतस्यतुरात्रावेवदाहः॥उक्तं
चस्मृतिसंग्रहे॥रात्रौदग्ध्वानुपिंडांतंकृत्वावपनवर्जितं॥वपनंनेष्यतेरात्रौ

श्वस्तनावपनक्रिया॥नियमवचनात्॥ ॥दिनमृतस्यालस्यादिनारात्रिनिषेधनार्थं
॥तथा॥ ॥श्वावराङ्म्रुषितंचेत्र्यनकृत्वाकुर्यांद्दहेत्क्व तद्रनिस्मृतिरत्नावल्यां॥दे
हांतेदर्शपातेभविष्यपुराणे॥प्रवृत्ताशौचतंत्रस्तुयदिदर्शःप्रपद्यते॥समाप्य
चोदकान्पिंडानस्नानमत्रसमाचरेत्॥पित्रोस्तुयावदाशौचंदद्यात्पिंडंतिलांज
लीन्॥पित्रोरित्येकशेषः॥यत्तुगालवः॥पित्रोराशौचमध्येपियदिदर्शःमतावदे
वोत्तरंतत्रपर्यवसेद्यदात्परमितिनतदनौरसपुत्रोयदाकरोषितद्विषयं॥आ
पद्विषयंवेतिपारिजाते॥पाराशरमाधवीयेनिर्णयामृतेच॥त्र्यहानंतरंदशे
मातृपितृनेत्रस्यापिसमाप्तिर्नतुत्र्यहमध्येदर्शपातेनद्विषयमेव॥गौतमवचनं
अन्येषांतुयदाकदाचिद्दशाहमध्येदर्शपातेतंत्रसमाप्तिरिति॥दाहकालिग्निना
शेदग्धकाष्ठैरग्निंमथित्वातेनदहेत्॥भूर्भुवःस्वःस्वाहेत्याज्याहुतिंकृत्वालौ
किकेनाग्निनावा॥तद्देहंमहाजलेवाक्षिपेत्॥दशाहंप्रेतपिंडंदत्वास्नात्वा

नुक्तौ असपिंडस्य अहोपवासः॥ सपिंडस्यैकाहः मत्ताद्विगुणं द्वयोः प्रेतकृत्यं कुर्वति॥
संचयनार्दर्वाक्स्त्रीसंगमे चांद्रं॥ ऊर्ध्वं कात्रयं॥ प्रेतकृत्यं कुर्वतां अन्येषां प्रेताशौ
चिनां पूर्वं संचयनात्त्रिरात्रं॥ पश्चादुपवास इत्यादि स्मृत्यंतरे बोध्येयं॥ अन्य द
प्युक्तं कारिकायां॥ पत्नीमपि दहेद्देव भर्तुः पूर्वं मृता यदि॥ अनग्निका दहेदेवक
पालेन हविर्भुजा॥ अग्निवर्णं कपालं तु कृत्वा तत्र विनिक्षिपेत्॥ कारिकादित तो
यस्तु जातः स तु कपालजः॥ अनुपनीतस्याप्येवं स्मृत्यंतरे तु ग्रहस्थो ब्रह्मचारी च
विधुरो विधवा स्त्रियः॥ औपासनस्याग्रपतनस्तुषाग्निश्च कपालजः॥ देवलः॥ चंडाला
ग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित्॥ पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचि
तः॥ आहिताग्नेर्देशांतरमरणे विशेषस्तत्रैव॥ यस्मिन्देशे स्थितो नाग्निस्तत्रोन्यत्र
मृतो यदि॥ चरुः स्थिकृतः कालेयः पूर्णाकृतिरथापि वा॥ अन्यदीयेन वह्निना या
गौस्तु पतयोधरा॥ आशरीराकृते तस्याः पयमो होम इष्यते॥ अन्यस्याश्चापि होत

वंपयमानदसंभवे॥ तथा॥ ॥ कृष्णपक्षे प्रमीयते यद्याहिताग्निराकृतिः॥ शेषस्तु
जुहुयाद्दर्शपर्यंतापस्तहोमवत्॥ तदानीमेव जुहुयात्सायंकालाहुतीरपि॥ सां
यं म्रियेत चेत्सायमाहुतीर्जुहुयाद्य॥ तदानीमेव जुहुयात्प्रातःकालाहुती
रपि॥ मधुकृष्णी मंते चेष्टिनिर्व्वनं च होमयोः॥ दर्शं वाप्यग्रकुर्वीत स्थालीपा
कं तदैव तु॥ होमदाशौनकर्तव्यो पुनर्यदि स जीवति॥ म्रियते यो यवसाये ह्निने
वैनं यान येत्तदा॥ म्रियता धिश्रितेनित्यहोमद्रव्येहविष्षु च॥ यथानिःशेष
दग्धानि तथा तानि दहेत्तदा॥ बर्हिष्यासादिते चैव हविष्षु म्रियते तदा॥ यासां
परिगृहीतानि देवतानां हवींषि च॥ चतुर्थ्यंतानि नामानि तावतीनां वदेदथ
स्वाहाकारेण युगपत्सर्वाणि जुहुयादथ॥ नेष्टं स्विष्टकृदाद्यत्र शेषं कार्य
मिति स्थितिः॥ ॥पिंडप्रमाणं तु॥ ॥एकोद्दिष्टे सपिंडे च कपित्थं तु विधीयते

निरणास्त्रीकादिकायामा[illegible] यत्र[illegible] पिंडास्तत्र [illegible]
स्तत्र [illegible] पिंडस्तु दीयते [illegible] इति।

अंत्ये० ६२ नारीकेरप्रमाणं तु प्रत्यहं मासिकेन तथा॥ तीर्थे दर्शे च संप्राप्ते कुकुटांडप्रमाणतुं कं
महालये गयाश्राद्धे कुर्यादामलकोपमं॥ प्रथमेहनि पिंडेन मुखं मूर्धा प्रजायते
चक्षुश्रोत्रं नासिके च द्वितीयेहनि जायते॥ भुजौ वक्षस्तथा ग्रीवा तृतीयेहनि
जायते॥ नाभिस्थानं गुदं लिंगं चतुर्थेहनि जायते॥ ऊरू ते पंचमे ज्ञेयो षष्ठेम
र्मसमुद्भवः॥ सप्तमे त्वक्शिरस्थानि सर्वलोमानि चाष्टमे॥ नवमे वीर्यसंभू
तिर्दशमे क्षुत्पिपासयोः॥ अनुगम्येच्छया प्रेतं स्नानि मज्जाति मेव वा॥ स्नात्वा
सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥ घृतनाशे तु गायत्र्या दशकृत्वः पिबे
द्यपः॥ ज्येष्ठेन वा कनिष्ठेन सपिंडीकरणे कृते॥ देशांतरगतानां च पुत्राणां च
कथं न वेत्॥ कृत्वा तु वपनं कार्यं दशाहांते तिलोदकं॥ ततः सपिंडीकरणं कु राम० ६२
र्यादेकादशेहनि॥ द्वादशाहेन कर्तव्यं इति शातातपोऽब्रवीत्॥ ॥स्मृत्यर्थसारे
तेषां सदैकोद्दिष्टमेव॥ ब्रह्मचारिणामनपत्यानां च सपिंडनं नास्ति॥ ॥सु

कुमारमृतानां च सपिंडनं नास्ति व्यवहितैः सापिंड्यं कार्यं न वा॥ केचित्सर्वत्र सपिंड
नमाहुरिति॥ यतीनां प्रेतत्वं नास्ति॥ अतस्तेषां नैकोद्दिष्टं न सपिंडीकरणं किंतु
एकादशेहनि पार्वणं कार्यं॥ दंडग्रहणात्पूर्वमेव मृते तु दाहादि सापिंडनांतं सर्व
विधिना कार्यमेव॥ तत्र ब्रह्मचारिमरणे विधानमाश्वलायनो विशेषः॥ येषां कुले त्व
साधो ब्रह्मचारी निधनं प्राप्नुयादिति॥ तत्कुलं क्षयमाप्नोति सापिंडगतिमाप्नु
यात्॥ ग्रहत्वं प्राप्नुयाद्देहो धिक्कुमेन वरतं श्च मेत्॥ तस्यापि तस्य वंशस्य गतिमि
च्छेन्महीयसीं॥ विधानं च विधायाग्नौ और्ध्वदेहिकमाचरेत्॥ मृतस्याम्रियमाणस्य
षडब्दं व्रतमादिशेत्॥ त्रिंशत्ब्रह्मचारिभ्यो दद्यात्कौपीनकान्तवान्॥ हस्तमा
त्राः कर्णमात्रा दद्यात्कृष्णाजिनानि च॥ पादुकाछत्रमाल्यानि गोपीचंदनमेव च
मणिप्रवालमालाश्च ब्रह्मसूत्राणि चार्पयेत्॥ मंत्रैस्तल्लिंगकैश्चैव ब्रह्मसायु
ज्यसिद्धये॥ अभावे ब्रतिनां प्रज्याग्गृहस्थाः साधवः शुभाः॥ एवं कृते विधाने च

विघ्नस्तस्य न जायते॥ ब्रह्मचारिमरणे अर्कविवाहः शौनकः॥ ॥ब्रह्मचारी मृतो रीतिं
कथयामि समासतः॥ मंत्रवत्कीर्णदोषस्य प्रायश्चित्तं प्रशांतये॥ द्वादशाब्दं षडब्दं
वात्र्यब्दं वा शक्त्या यथाचरेत्॥ ततो व्रतविसर्गाख्यं विधिं सम्यक् समाचरेत्॥ स्नातको
ब्रह्मचारी च निधनं प्राप्नुयाद्यदि॥ सोयोज्यश्चार्कविधिना संयोज्यैतौ परस्परं॥ अ
ग्न्यग्निमुपसंधाय॥ एवंगुणेत्यादि अमुकगोत्रस्यामुकनाम्नो मृतस्य ब्रह्मचारि
णो व्रतविसर्गं करिष्ये॥ ॥तदंगं हिरण्येन नांदीश्राद्धं करिष्ये इति संकल्प्य तत्कृ
त्वान्वाधानाद्याघारांतं कृत्वाज्यं तु जुहुयात्॥ व्याहृतयश्चतस्रः॥४॥ अग्नये व्रतये
५ अग्नये व्रतानुष्ठानफलसंपादनाय ६ विश्वेभ्यो देवेभ्यः ७ ततः स्विष्टकृदा
दि समाप्य पश्चादर्कसमीपे अथवार्कशाखामानीयार्कविवाहः॥ अर्कब्रह्मचारि
णोर्हरिद्रानुलिप्य पीतसूत्रेण वेष्टनवस्त्रयुग्मेनाच्छाद्याग्निमुपसमाधाय॥ एवंगु
णेत्यादि तिथौ अमुकगोत्रस्येत्यादि और्ध्वदेहिकाधिकारार्थं अर्कविवाहं करिष्ये॥

तदंगं हिरण्येन नांदीश्राद्धं करिष्ये इत्यादि आघारांतं कृत्वा आज्यहोमः॥ ॐ अग्नये स्वाहा
१ बृहस्पतये स्वाहा २ विवाहविधियोजकाय ३ ॐ यस्मै त्वा कामकामाय वयं सम्राड्यजा
महे॥ तमस्मभ्यं कामं दत्वाथेदं त्वं घृतं॥ पिब स्वाहा ४ कामायेदं न मम ततो व्याहृतयः
ततः स्विष्टकृदादि॥ अर्कशाखां ब्रह्मचारी शवं चैव तु षाग्निना विधिवद्दहेत्॥ ॥इति ब्र
ह्मचारिमरणविधिः समाप्तः॥ ॥अथ कुष्ठिमृतमरणे विधिर्यमः॥ मृतस्य॥ ॥
कुष्ठिनो देहं निखनेत्कोष्ठभूमिषु॥ वासरत्रितयं पश्चादुद्धृत्यान्यत्र तं दहेत्॥ गंगं
गाजवनं कार्यं निक्षेपे विधिरुच्यते॥ षडब्दव्रतपूर्वेण विधानं त्यक्तुं चरेत्॥ संक
ल्पविधिना केचित्स्नवदंति मनीषिणः॥ इत्येतत्कुष्ठिनो सूर्ध्वं कथितं शास्त्रकोविदैः
स्मृतिवद्भिरन्यैर्यमाद्यैः पूतविग्रहैः॥ ॥इति कुष्ठमरणे विधिः॥ ॥अथ पंचकदा
हमरणविधिः॥ ॥आदौ कृत्वा धनिष्ठार्धमेतं नक्षत्रपंचकं॥ रेवत्यंतं सदा हूर्ध्वम
शुभं सर्वदाह्य जपेत्॥ दाहस्तत्र न कर्तव्यो विपादः सर्वजातिषु॥ न जालं दीयते तेषु
त्वशुभं सर्वदा भवेत्॥ तस्य फलं ज्योतिषे धनिष्ठापंचकं ग्रामं वारुणं कुलपंचकं

पूर्वायांबाधयाम्यस्यंभ्रराग्रहपंचकं॥ रेवतीमात्पक्षस्यंएतन्नक्षत्रपंचकं॥ पंचका
नंतरंकार्यंकर्तव्यंसर्वमन्यथा॥ पुत्राणांगोत्रिणांतस्यसंतापोऽरूपजायते॥ गृहेहा
निर्भवेत्तस्यैष्टेरक्षेषेवमृतस्तुय॥ तत्रविधिः॥ ॥शावस्यतुसमीपेतुक्षेप्तव्याःपुत्र
लास्तथा॥ दर्भमयास्कचत्वारऋक्षमंत्रानिरक्षिताः ततोदाहश्चकर्तव्यःतैश्चपु
त्तलकैःसह॥ सूतकांतेतदापुत्रैःकार्यंशांतिकपौष्टिकं॥ पंचकेषुमृतोयेषुसौ
नगतिंलभतेनरः॥ तिलांश्चैवहिरण्यंचतद्देशेघृतंदहेत्॥ अथपंचकदाहमृत
विधिः॥ ब्रह्मपुराणे॥ ॥कुंभमीनस्थितेचंद्रेमरणंयस्यजायते॥ नतस्योर्ध्वगतिर्दृ
ष्टासंतानेनशुभंभवेत्॥ नतस्यदाहकर्तव्योविनाशोस्येषुजंतुषु॥ पंचकानंतरं
कार्यं — — दाहादिकंखलु॥ अथवातद्दिनेकार्योदाहस्तुविधिपूर्वकं॥ क्रियतेमा राम०
नुषानंतुसद्यःसंततिकारणात्॥ विप्रस्यातियग्नतःकार्योदाहस्तुविधिपूर्वकं ६३
धनिष्ठापंचकेजीवोमृतोयदिकथंचन॥ त्रिपुष्करेयामेम्यनेचकुलजन्मारयेध्रु

वं॥ तदनिष्टविनाशार्थंविधानंसमुदीर्यते॥ दाहदेशेशवंनीत्वास्थापयेच्चप्रय
त्नतः॥ दर्भाणांप्रतिमाःकार्याःपंचोर्णासूत्रवेष्टिताः॥ यवपिष्टेनानुलिप्तास्ता
भिःसहशवंदहेत्॥ प्रेतवाहःप्रेतसखःप्रेतपःप्रेतभूमिपः॥ प्रेतहर्तापंचम
स्तनामान्येतानिचक्रमात्॥ ॥अथप्रयोगः॥ ॥देवगुरुनत्वादि॥ ॥अमुक
गोत्रस्यामुकस्यधनिष्ठापंचकादिमरणसूचितवंशानिष्टविनाशार्थंपंचकमर
णविधिंकरिष्यइतिसंकल्प्य॥ गंधमाल्याद्यैःप्रतिमाअलंकृत्यदाहसमीपेप्रे
तोपरिन्यसेत्॥ प्रथमांशिरसि॥ द्वितीयंनेत्रयोःतृतीयंवामकुक्षौ॥ चतुर्थंना
भौपंचमींपादयोःतदुपरितान्नामनामंत्रैर्घृताहुतीःकृत्वादकधारांचदत्वा॥
यमायसोमंसुनुतइतित्र्यंबकंयजामहइतिचाभ्यांमंत्राभ्यांप्रतिमासप्रत्येकं
आज्याहुतिर्जुहुयात्॥ ततोविधिनाप्रेतंदहेत्॥ एकादशेहनिसंप्राप्तेप्रातरू
स्यायपुत्रकः॥ आहृत्यकलशान्पंचस्थापयेदृक्षमंत्रकैः॥ सुवर्णीराजतौ
ताम्रीस्थापयेत्पंचमृत्तिकाः॥ ऋक्षमंत्रैःप्रतिष्ठाप्यस्थापयेत्कलशोपरि

स्नानंतुविधानेनकारयेद्भक्तिपूर्वकं॥ रुद्रमंत्रैश्चसंपूज्यगंधपुष्पैश्चधूपितः
नैवेद्यंकारयेत्तत्रप्रेतमुद्दिश्यकारयेत्॥ आरार्तिकंततःपश्चात् गृह्योक्तवि
धिनाततः कुंडाग्रेस्थंडिलंकृत्वास्थापयेद्वह्निनावसुं॥ आज्यस्यसंस्कृतिंकृ
त्वाबर्हिरास्तरणंततः ग्रहान्संस्थापयेत्तत्र अधिदेवसमन्वितान्॥ प्रतिष्ठा
प्यप्रतास्त्रैव आज्यसंस्थापनंततः॥ इध्माधानंततःकृत्वाआघाराद्यमयोर्हु
नेत्॥ रुद्रमंत्रैस्ततोकृत्वास्रुवेणाज्याहुतीः पृथक्॥ ततस्तिलाक्षतैर्होमं
अर्द्दक्षाणांचकारयेत्॥ यमायधर्मराजायेतिहुनेत्॥ प्रायश्चित्तंततोकृत्वा
पूर्णांदद्याच्छुभावहं॥ ग्रहान्संपूजयेत्तत्र गंधपुष्पैश्चधर्मतः॥ स्रुवेणनालि
करेणेतेनअर्घ्यंदत्वाविधानतः ततोऽर्घ्यंसमादायसर्वौषधिसमन्वितं॥
दक्षिणाभिमुखोभूत्वातर्पयेद्यमंततः ततोप्रेतायतर्पणंकृत्वा॥ ततःप्रे
तगणादत्त्वाप्रेतस्यमुक्तिहेतवे॥ अनेनविधिनासर्वंकर्तव्यंरुद्रपंचके॥

तस्यगेहेनवेछांतिसुखंप्राप्नोत्यसंशयं॥ पुण्याहवाचनंकृत्वाविधिनाशांतिकारकः
देवस्यत्वेतिमंत्रेणपावमान्यस्ततःपरं॥ समुद्रज्येष्ठाइतिमंत्रेणत्रायंतामितिमंत्रत
ततःपौराणिकैर्मंत्रैरभिषिंचेत्तमूर्धनि॥ आशीर्वादादनुपूर्वंदानंदद्यात्ततःपरं॥
तिलधेनुंहिरण्यंचकार्पासंलवणंतथा॥ सप्तधान्यंक्षितिंगावएकैकंपावनंस्मृ
तं॥ कांस्यपात्रस्थितंतैलंवीक्ष्यदद्याद्विजन्मने॥ पूर्वकुंडेकृणुष्वपाज इत्यनुवाकः
दक्षिणेतद्देवाधार्यः॥ पश्चिमेरुद्रंवाचउत्तरेवसोःपवित्रं॥ ईशान्येरुद्रजपः॥ इ
तिपंचककविधानं॥ ॥ मूलर्क्षांतेततःपुत्रःकुर्याच्छांतिकपौष्टिकं॥ कांस्यपात्रे
स्थितंतैलंवीक्ष्यंदद्याद्विजन्मने॥ रुद्राविष्णुमहेशेंद्रवरुणप्रीतयेततः माषमु
द्गयवव्रीहिप्रियंग्वादिप्रयच्छति॥ स्वर्णदानेरुद्रजाप्यंजलसहोमोद्विजार्चनं॥ गो
भूदानंषडेतानिकुर्याद्दोषोपशांतये॥ अन्यत्रापिस्वगृह्योक्तविधानेनकृत्वा
ग्निस्थापनंततः अन्वाधानंनिर्वपणंदैवतानांतथाहुतिः॥ यमायधर्मरा

अंत्ये० जायमृत्यवे चांतकाय च॥ वैवस्वताय कालाय सर्वभूतक्षयाय च॥ औदुंबराय द
६५ ध्नाय नीलाय परमेष्ठिने॥ वृकोदराय चित्राय चित्रगुप्ताय वै क्रमात्॥ विधिना
श्रपणं कृत्वा एकैकामाहुतिं हुनेत्॥ अन्यत्रापि धनिष्ठापंचकमृते पंचरत्नानि
तन्मुखे॥ न्यस्याहुतित्रयं दद्यात्कर्तव्यं हवपामिति॥ ततो निर्हरणं कुर्यादिवसा
न्ते विधिः स्मृतः॥ इतरं निखने देवजले वा प्रतिपादयेत्॥ द्विपदृक्षामुखे तद्धि
रण्यशकलं मुखे॥ ॥इति पंचकमृतविधिः॥ ॥अथ सर्पहतेनु नागव्रतं का
र्यं॥ ॥तत्संवत्सरे श्रावणशुक्लपंचमीमारभ्यान्यां वा शुक्लपंचमीमारभ्य पंच
म्यामुपवासः॥ यद्वा चतुर्थ्यामेकभक्तं पंचम्यां नक्तं दारुमयं मृन्मयं वा नागं पं
चफणां कृत्वा गंधैः करवीरैः शतपत्रैर्जातिपुष्पैर्धूपदीपैरनंतं वासुकिं शं राम०
खपद्मं कंबलं कर्कोटकं अश्वतरं धृतराष्ट्रं शंखपालं कालियं तक्षकं कपिलं च ६५
प्रतिमासं नामभिः शुक्लपंचमीषु संपूज्य ब्राह्मणान्पायससमोदकैश्च भोजयेत्॥

संवत्सरांते चैवं पूज्य महद्ब्राह्मणभोजनं॥ शक्त्या सौवर्णनागदानं च कुर्यात्॥ अथवो
भयोः पक्षयोः पंचमीषु भूमौ नागं पिष्टेन लिखित्वा सितेन गंधेन सितपुष्पैस्तिल
तंदुलैश्चाभ्यर्च्य गव्यं क्षीरं मोदकं च भूमौ निवेद्य उपस्थायैवं वदेत्॥ मुंच मुंचा
मुकमिति॥ तद्दिने मधुरमश्नीयात्॥ एवमब्दं विधानानामभ्यर्च्य पूर्णेऽब्दे यथा
शक्ति सुवर्णनागं च दद्यात्॥ ततो नारायणबलिं च कृत्वा श्राद्धादि सर्वं च कुर्यात्
अत्र मूलवचनानि स्मृतिरत्नावल्यां ज्ञेयानि॥ ॥अथ पूर्वोक्तमारणादीनां बुद्धि
पूर्वकमात्मघातकानां च नारायणबलिप्रयोगः॥ ॥कस्यांचिच्छुक्लैकाद
श्यां नद्यामन्यत्र वा तीर्थे गत्वा स्नानादि कृत्वा च मध्यदेशकालौ स्मृत्वा अमुकगोत्र
स्यामुकशर्मण आत्महत्यापापखंडिताद्द्विजनिंतपापोपशमनद्वारा और्ध्वदेहिके
संप्रदानत्वयोग्यतासिद्ध्यर्थं नारायणबलिं करिष्ये इति संकल्प्य॥ कलशपं
चकं व्रीहिणां यवानां चोपरि स्थापयित्वोदकेन पूर्या रोहिष्टेति मंत्रत्रयेण॥

अंसे० निमंत्र्य सर्वौषधी तिलगंधादि प्रत्येकं प्रक्षिप्य वस्त्रेणावेष्ट्य पुष्पाणि पंचरत्नानि
६६ च प्रक्षिप्य तदुपरि ताम्रादि पात्रे ब्रह्म विष्णु शिव यम प्रेतानां पंचमूर्तीः स्थापयेत्
आवाहनाद्युपचाराः कार्याः॥ तत्र विष्णोः पुरुषसूक्तेन पूजयेत्॥ ब्रह्मणो हि
रण्यगर्भ इति रुद्रस्य कद्रुद्रायेति॥ यमस्य यमाय सोमं इति प्रेतस्य नाममंत्रेण
षोडशोपचारैः पंचदेवताः पूजयित्वा॥ स्वगृह्योक्तमार्गेण स्थंडिलेऽग्निं प्रतिष्ठा
प्य चरुहोमं कुर्यात्॥ अन्वाधाने आज्यभागांतमुक्त्वा नारायणं षोडशाहुत्या
चरुणा यक्ष्य इत्युक्त्वाग्निं स्विष्टकृतमित्यादि प्राकृतमुक्त्वाग्नौ अन्वाधान
समिधौ कृत्वा स्वगृह्योक्तमार्गेण निर्वापादि विधिना चरुं श्रपयित्वा आज्यभा राम०
गांतं कृत्वा पुरुषसूक्तेन षोडशाहुतीर्जुहुयात्॥ नारायणायेदं न ममेति ६६
त्यागः॥ अन्यत्सर्वं प्राकृतं समाप्याग्निदेवसमीपे ॥ अमुकगोत्रायामु
कशर्मणे प्रेताय विष्णुरूपिणे अयं पिंड इति मधुनाप्लुतां तिलादिमि

श्रां दश पिंडान् विष्णुरूपिणं प्रेतमनुस्मरन्॥ प्रेतस्य नाम गोत्रे उच्चार्य दक्षि
णाग्रेषु दर्भेषु दक्षिणामुखोऽपसव्येन दत्तायनेय ममेति सूक्तेन पिंडाननुमं
त्र्य कुशैः शंखोदकेन दत्त्वा यत्तेय पुरुषसूक्तेन पिंडानभ्यंच्य॥ गंधादि
रभ्यर्च्य पिंडप्रवाहणांतं कृत्वा नद्यां क्षिपेत्॥ न यत्न्ये दद्यात्॥ ततः पुरुष
सूक्तेन प्रेतस्य नाम गोत्रे उक्त्वा अमुकनारायणरूपं तर्पयामीति षोडशवा
रं तर्पयेत्॥ प्रत्यृच॥ ततस्तु करपादाहार परिमितमन्नं विष्णवे ब्रह्मणे शिवाय स
किंकराय च बलिं गृहीत्वा ब्रह्म विष्णु महादेव यमस्त्वेव सकिंकरः॥ बलिं गृ
हीत्वा कुर्वंतु प्रेतस्य चमुमांगतिं मिति काश्यपी विष्णवादिभ्य इमं बलिं समर्प
यामि इति बलिं दद्यात्॥ स्मृत्यर्थसारे तु होमतर्पण बलयो नोक्ताः॥ ततः प्रति
दैवतं त्रिविधं फलं संमप्य शर्करा गुड सर्पिषी षि निवेदयेत्॥ गीतादिना जा
गरणं कुर्यात्॥ ततोऽस्यामेव रात्र्यां मधुग्मान्पंच समनव ब्राह्मणान्॥ मंत्र्य

अंत्ये० उपोषितश्चोत्तूनेमध्याह्नेविष्णवादीनभ्यर्च्यद्वेशादिस्मृत्वानारायणबलौ
६७ विहितंश्राद्धंपंचकमेकोद्दिष्टविधिनाकरिष्यइतिसंकल्प्यैकोद्दिष्टविधिना
ब्राह्मणपादप्रक्षालनादिकृत्वायथाज्येष्ठमुखानुपवेश्यआवाहनादितृप्ति
प्रश्नांतंकृत्वासपिंडपितृयज्ञवदुल्लेखनाद्यवनेजानंतंविष्णवेब्रह्मणेशि
वायदमायसकिंकरायचतुरःसपिंडान्दत्वानामगोत्रविशिष्टंविष्णुरू
पप्रेतंस्मृत्वापंचमंपिंडंदद्यात्॥ततोविप्राणांचअतिदक्षिणानित्तो
पयित्वातन्मध्येचैकंगुणवंतंब्राह्मणंप्रेतस्थानेयोजितंप्रेतबुध्यासंस्म
रन्॥भूमिहिरण्यादिनातिशयेनसंतोष्यअक्षय्यस्थानेतिजदर्भतुलसी राम
पुष्पाशंखोदकधारांदद्यात्॥ततस्तैःपवित्रपाणिभिर्ब्राह्मणैःकृत्वाअ ६७
मुकगोत्रायामुकशर्मणेप्रेतायविष्णुरूपाययेदंतिलोदकंउपतिष्ठत्॥

मितिवाचयित्वासकुशतिलमुदकांजलिंदापयेत्॥ततःस्नात्वागुडशर्करापाय
सादिव्यंजनैःसहितोभुंजीतेति॥ ॥इतिनारायणबलिः॥ ॥अथसहगमन
विधिः॥ ॥अथान्वारोहणंस्त्रीणामात्मनोभर्तुरेवच॥सर्वपापक्षयकरंन
रकोत्तारणायच॥अनेकस्वर्गफलदंमुक्तिदंचतथैवच॥जन्मांतरेचसौभाग्य
धनपुत्रा[illegible]दिप्रदं॥एवंगुणेसा[illegible]हि॥आत्मनोभर्तुश्चैतज्जन्मांतरपरंपराजिति
स्य सर्वस्य [illegible]भयवारालक्ष्मीनारायणप्रीतयेपुराणोक्तानेकफलप्राप्तयेचान्वा
रोहणंकरिष्ये॥तदंगत्वेन विहितंहरिद्राकुंकुमांजनादिसौभाग्यद्रव्ययुतंवं
शपात्रदानंचकरिष्यइतिसंकल्प्य॥सोपस्कराणिशूर्पाणिदद्यात्॥तत्रमं
त्रः॥लक्ष्मीनारायणोदेवोबलसत्वगुणाश्रयः॥गाढंसत्वंचमेदेहे[illegible]
परितोषितः॥सोपस्कराणिशूर्पाणिवायनैःसंयुतानि[illegible]॥लक्ष्मीनारायण
प्रीत्यैसत्वकामाददाम्यहं॥अनेनसोपस्करशूर्पदानेनलक्ष्मीनारायणौप्री

येतां॥ अग्नेः समीपमागत्य पंचरत्नानि पल्लवे। नीलांजनं तथा बध्वा मुखे मुक्ताफ
लंन्यसेत्॥ ततोग्निप्रार्थनं कृत्वा मंत्रनानेन निश्चितं॥ स्वा... ... निर्वाणसर्व
गोत्रकृताशन॥ सर्वमार्गप्रदानेन नयमां पुरस्करे तिकं॥ इत्यग्निप्रार्थ अग्न्यन...
मुकुयात्॥ ॐ अग्नये तेजोधिपतये स्वाहा॥१ विष्णवे सत्वाधिपतये स्वाहा॥२॥ का
लाय धर्माधिपतये स्वाहा ३ पृथिव्यै लोकधात्र्यै स्वाहा ४ अद्भ्यो रसाधिष्ठात्रीभ्य
स्वाहा ५ वायवे बलाधिपतये स्वाहा ६ आकाशाय सर्वाधिपतये स्वाहा ७ काला
य धर्माधिष्ठात्रे स्वाहा ८ अप्सु: सर्वसाक्षिणीभ्य स्वाहा ११ एकादशाकृती कृत्वा कु
र्यादग्नेः प्रदक्षिणं॥ ततः शिलां सोपस्करां संपूज्य तां आरुह्य फलपुष्पांजलिं गृ
हीत्वाग्निं प्रार्थयेत्॥ त्वमग्ने सर्वभूतानामंतश्चरसि साक्षिवत्॥ त्वमेव देव जा
नीषे न विदुर्यानि मानुषाः॥ अनुगच्छामि नर्तारं वैधव्यभयपीडिता॥ सत्वमार्ग
प्रदानेन नयमां नर्तुरं कि वैतिकं॥ मंत्रमुच्चार्य ज्ञानकैः प्रविशेत्व कृताशनं॥

...पितस्तोत्तरः सुतो देवरः शिष्यो वा नमस्कृत्य करे धृत्वा॥ उदीर्ष्वेति वान्यां मंत्रा
भ्यां सत्वरहितां समुत्थापयेत्॥ सताधिका तु पुत्रैः समाश्वास्य भर्तारं विष्णुरू
पं स्मरन् चितिं प्रवेशयेत्॥ हारीतः॥ मृतं भर्तारं या नारी धर्मशीला दृढव्रता।
अनुगच्छति भर्तारं शृणु तस्यास्तु यत्फलं तिस्रः कोट्योर्धकोटी च यावत्संगरु
हाणि वै॥ तावंत्यब्दसहस्राणि स्वर्गलोके महीयते॥ मातृकं पैतृकं चैव यत्र
कन्या प्रदीयते॥ कुलत्रयं पुनात्येषा भर्तारं यानुगच्छति॥ इत्यादि वाक्यपर्या
लोचनया संकल्पे तत्फलमुल्लेख्यं॥ अन्वारोहणे अवयव पिंडार्थः पाकस्त
त्कर्मैकोदककिया॥ पिंडदानक्रिया तत्र श्राद्धं पत्या हि कं तथा॥ २
ज लिं॥ ॥ पृथक्शीलेन कुर्वं तिद्यादेकशिलेनया॥ नवश्राद्धानि स
त्याद्धानि सर्वासि पिंडीकरणे अन्वारोहे कृते पत्न्याः॥ पृथक्पिंडांस्तिलां

अंत्ये० वणिसपिंडीकरणं पृथक्॥एक एव वृषोत्सर्गो गौरेका तत्र दीयते॥अ
६९ न्वारोहणे एकचित्यारोहणे वा स्त्रियाः पृथक् पिंडदानं नास्ति॥भर्तुः कृते
स्त्रियाः कृतं भवतीति स्मृत्यर्थसारे॥ ॥तत्रैव केनेति व्रतः॥तत्रैव दि
त्रयेपोत्पन्नो अन्वारोहणं च गर्भिणीनां बालापत्यानां रजस्वलानां सू
तिकानां च निषेधं गर्भिणीनां तत्र जातिवधसमं॥ब्राह्मण्या एकचित्यारोह
णमेव न पृथक्चित्यारोहणं॥क्षत्रियादिस्त्रियाः पृथक्सह वा चितिः॥
असवर्णायाः पृथक्चितिरेव॥मदनपारिजाते गमने अन्वारोहणेन तत्र्या
द्धमात्रं पृथक्॥तत्रापि पिंडमातामहपार्वणद्वयवत्सहैव वानुष्ठानं॥ राम०
आपस्तंबः॥ चितिभ्रष्टा तु या नारी मोहाद्विचलिता भवेत्॥प्राजापत्ये ६९
न शुध्येत तस्मात्पापकर्षणात्॥भर्तृनुगमने चितिभ्रष्टेत्यर्थः॥ पत्या
रजस्वलायां यदा भर्ता मृतः सत्र देशकालवशात्सहैवानुगंतुमिच्छति॥

न पंचमादिदिवसं प्रतीक्षते॥ तत्र विधिरुच्यते॥ ॥यदा स्त्रियमुदक्यां पतिः प्राणान्स
मुत्सृजेत्॥ द्रोणमेकं तंडुलानामवहत्या विशुध्यते॥मुशलाघातैस्तदमुकस्त्र
नेयो नि[illegible]॥निरस्कानां मन्यमाना स्वे चित्ते तदसृक्क्षयं॥दृष्ट्वा शौचं प्रकु
र्वीत पंचमृत्तिकया पृथक्॥त्रिंशद्विंशतिदश पंचगवां दत्त्वा वहक्रमात्॥विप्रा
पां वचनात्क्षुधास्मारोहे [illegible] शाने॥ नारीणां सरजस्काणां नानियं शुद्धिरुदा
हृता॥ ॥इत्यन्वारोह[illegible]॥अथ रजस्वलामरणे विधिः॥ ॥अंतरिक्षमृतायेव
बलावपु प्रमादतः॥उदक्यासूतिकानारीचरेच्चांद्रायणत्रयं॥संग्रहे॥ ॥पंच
भिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां॥वस्त्रांतरावृतां कृत्वा दाहयेद्विधिपूर्वकं
हवशाना तपस्त्व॥[illegible]स्वलायाः प्रेतायाः संस्कारादीनि वा चरेत्॥ ऊर्ध्वं त्रि
रात्रात्स्नातायाः शवधर्मेण दाहयेत्॥ ॥इति त्र्यहोरा[illegible]स्कारमाह॥अत्र
देशकालानुसारात् व्यवस्था॥ अद्येत्यादि॰ अमुगोत्राया अमुकप्रेतायाः रजस्व

अंत्ये० ७०

स्त्रीयावस्थामरणनिमित्तप्रत्यवायपरिहारार्थं और्ध्वदैहिकयोग्यतार्थं च चांद्रा
यणत्रयं प्रायश्चित्तपूर्वकं शूर्पेणाष्टोत्तरशतं स्नानं करिष्य इति संकल्प्य॥ ब्रा
ह्मणवचनेन चांद्रा[illegible] कृत्वा यवपिष्टेन प्रेतमनुलिप्य स्वयं स्नात्वा शूर्पोदकेन
शतवारं स्नापयेत्॥ अनंतरं [illegible]स्याल्पभस्मगोमयमृत्तिकाकुशोदकं पंचगव्यमु
दोदकैः स्नापयेत् [illegible]पाव[illegible]नीः॥ स्वस्त्ययनीः सूक्तं यदंतियच्च दूरके आपो हि ष्ठे
ति तिसृभिः॥ कार्या[illegible] नित्यनिस्नाप्य पूर्ववस्त्रं परित्यज्य विधिना दहेत्॥ य
था॥ ॥ रजस्वलासूतिकां च [illegible]षष्ठान्यस्नापयित्वा काष्ठदग्धास्थीनि विधि
ना दहेत्॥ अथ सूतिकामरणे॥ ॥ सूतिकामरणे प्राप्ते क्षेत्रसर्वौषध्यानुलेप
नं॥ अन्न नालिंतु संस्पृष्टः शूर्पाणां तु शतं क्षिपेत्॥ पूर्ववत्संकल्प्य ब्राह्मणवच
नाच्चांद्रायणत्रयं कृत्वा पूर्ववच्छतं शूर्पस्नानं कृ[illegible]वामदेव्यवारुण्यादि तु
एवमिस्रुभि[illegible]रभिमंत्र्य॥ आपो हि ष्ठा येवाम नानिकारयित्वा॥ कुंभेन जलमाद

राम० ७०